संग्रहरामायणम्

युद्धकाण्डः



बेङ्गलूर नगरे

'श्रीराम प्रेस्' आख्य मुद्रणालये सम्मुद्रितः

१९५०

॥ श्रीः ॥

श्री सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्रपरब्रह्मणे नमः ।

संग्रहरामायणम्

—•—

अथ युद्धकाण्डः

नत्वा सीतापतिं रामं रामायणमहोदधेः ।
सारं सर्वोपयोगाय श्रीनिवासः समुद्धरे ॥

श्रुत्वा हनूमतो वाक्यं यथावदनुभाषितम् ।
रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ॥ १ ॥
"कृतं हनुमता कार्यं सुमहत् भुवि दुष्करम् ।
मनसापि यदन्येन न शक्यं धरणीतले ॥ २ ॥
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।
अप्रधृष्यां पुरीं लंकां रावणेन सुरक्षिताम् ॥ ३ ॥
यो वीर्यबलसंपन्नो द्विषद्भिरनिवारितः ।
प्रविष्टः सत्वमाश्रित्य श्वसन् को नाम निष्क्रमेत् ॥ ४ ॥
भृत्यकार्यं हनुमता सुग्रीवस्य कृतं महत् ।
एवं विधाय स्वबलं सदृशं विक्रमस्य च ॥ ५ ॥
यो हि भृत्यो नियुक्तः सन् भर्त्रा कर्मणि दुष्करे ।
कुर्यात्तदनुरागेण तमाहुः पुरुषोत्तमम् ॥ ६ ॥

तन्नियोगे नियुक्तेन कृतं कृत्यं हनूमता ।
न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः ॥ ७ ॥
अहं च रघुवंशश्च लक्ष्मणश्च महाबलाः ।
वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः ॥ ८ ॥
इदं तु मम दीनस्य मनो भूयः प्रकर्षति ।
यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् ॥ ९ ॥
एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः ।
मया कालमिमं प्राप्य दत्तश्चास्तु महात्मनः" ॥ १० ॥
इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे ।
हनूमन्तं महात्मानं कृतकार्यमुपागतम् ॥ ११ ॥
ध्यात्वा पुनरुवाचेदं वचनं रघुसत्तमः ।
हरीणामीश्वरस्यैव सुग्रीवस्योपशृण्वतः ॥ १२ ॥
"सर्वथा सुकृतं तावत्सीतायाः परिमार्गणम् ।
सागरं तु समासाद्य भूयो नष्टं मनो मम ॥ १३ ॥
कथं नाम समुद्रस्य दुष्पारस्य महाम्भसः ।
हरयो दक्षिणं पारं गमिष्यन्ति समाहिताः" ॥ १४ ॥
इत्युक्त्वा शोकसंभ्रान्तो रामः शत्रुनिबर्हणः ।
हनुमन्तं महाबाहुः ततो ध्यानमुपागमत् ॥ १५ ॥
तं तु शोकपरिद्यूनं रामं दशरथात्मजम् ।
उवाच वचनं श्रीमान् सुग्रीवः शोकनाशनम् ॥ १६ ॥
"किं त्वं सन्तप्यसे वीर! यथान्यः प्राकृतस्तथा ।
मैवं भूस्त्यज संतापं कृतघ्न इव सौहृदम् ॥ १७ ॥

संतापस्य च ते स्थानं न हि पश्यामि राघव! ।
प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ॥ १८ ॥
मतिमाञ्शास्त्रवित्प्राज्ञः पण्डितश्चासि राघव! ।
त्यजेमां प्राकृतां बुद्धिं कृतात्मेवाऽऽत्मदूषणीम् ॥ १९ ॥
समुद्रं लङ्घयित्वा तु महानक्रसमाकुलम् ।
लङ्कामारोहयिष्यामो हनिष्यामश्च रावणम् ॥ २० ॥
इमे शूराः समर्थाश्च सर्वे नो हरियूथपाः ।
त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम् ॥ २१ ॥
सेतुर्बद्धः समुद्रे च यावल्लँङ्कासमीपतः ।
सर्वं तीर्णं च मे सैन्यं जितमित्युपधारय ॥ २२ ॥
त्वं तु बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थकोविदः ।
मद्विधैः सचिवैः सार्धमरिं जेतुमिहार्हसि ॥ २३ ॥
न हि पश्याम्यहं कंचित्त्रिषु लोकेषु राघव! ।
गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥ २४ ॥
तदलं शोकमालम्ब्य क्रोधमालम्ब भूपते! ॥ २५ ॥
लङ्घनार्थं च घोरस्य समुद्रस्य नदीपतेः ।
सहास्माभिरिहोपेतः सूक्ष्मबुद्धिर्विचारय" ॥२६ ॥
सुग्रीवस्य वचः श्रुत्वा हेतुमत्परमार्थवित् ।
प्रतिजग्राह काकुत्स्थो हनुमन्तमथाब्रवीत् ॥ २७ ॥
"तपसा सेतुबन्धेन सागरोच्छोषणेन वा ।
सर्वथाऽपि समर्थोऽस्मि सागरस्यास्य लङ्घने" ॥ २८ ॥
श्रुत्वा रामस्य वचनं हनूमान् मारुतात्मजः ।

वाक्यं वाक्यविदां श्रेष्ठो रामं पुनरथाब्रवीत् ॥ २९ ॥
दग्धा च नगरी लङ्का प्राकाराश्चावसादिताः ।
बलैकदेशः क्षपितो राक्षसानां महात्मनाम् ॥ ३० ॥
येन केन च मार्गेण तराम वरुणालयम् ।
हतेति नगरी लङ्का वानरैरवधार्यताम् ॥ ३१ ॥
एवमाज्ञापय क्षिप्रं बलानां सर्वसंग्रहम् ।
मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचये" ॥ ३२ ॥
श्रुत्वा हनुमतो वाक्यं यथावदनुपूर्वशः ।
ततोऽब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ ३३ ॥
यां निवेदयसे लङ्कां पुरीं भीमस्य रक्षसः ।
क्षिप्रमेनां मथिष्यामि सत्यमेतद्ब्रवीमि ते ॥ ३४ ॥
अस्मिन् मुहूर्ते सुग्रीव! प्रयाणमभिरोचये ।
युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः ॥ ३५ ॥
निमित्तानि च धन्यानि यानि प्रादुर्भवन्ति च ।
निहत्य रावणं सीतामानयिष्यामि जानकीम् ॥ ३६ ॥
उपरिष्टाद्धि नयनं स्फुरमाणमिदं मम ।
विजयं समनुप्राप्तं शंसतीव मनोरथम् ॥ ३७ ॥
अग्रे यातु बलस्यास्य नीलो मार्गमवेक्षितुम् ।
वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ ३८ ॥
सागरौघनिभं भीममग्रानीकं महाबलाः ।
कपिसिंहाः प्रकर्षन्तु शतशोऽथ सहस्रशः ॥ ३९ ॥
गजश्च गिरिसंकाशो गवयश्च महाबलः ।

गवाक्षश्चाग्रतो यान्तु वाहिन्या वानरर्षभाः ॥ ४० ॥
यातु वानरवाहिन्या वानरः प्लवतां वरः ।
पालयन् दक्षिणं पार्श्वमृषभो वानरर्षभः ॥ ४१ ॥
गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः ।
यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः ॥ ४२ ॥
यास्यामि बलमध्येऽहं बलौघमभिहर्षयन् ।
अधिरुह्य हनूमन्तमैरावतमिवेश्वरः ॥ ४३ ॥
अङ्गदेनैव संयातु लक्ष्मणश्चान्तकोपमः ।
सार्वभौमेन भूतेशो द्रविणाधिपतिर्यथा ॥ ४४ ॥
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ।
ऋक्षराजो महासत्वः कुक्षिं रक्षन्तु ते त्रयः" ॥ ४५ ॥
राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः ।
व्यादिदेश महावीर्यान् वानरान् वानरर्षभः ॥ ४६ ॥
ते वानरगणाः सर्वे समुत्पत्य युयुत्सवः ।
गुहाभ्यः शिखरेभ्यश्च आशु पुप्लुविरे तदा ॥ ४७ ॥
ततो वानरराजेन लक्ष्मणेन च पूजितः ।
जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥ ४८ ॥
शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ।
वारणाभैश्च हरिभिर्ययौ परिवृतस्तदा ॥ ४९ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवंगमाः ।
क्ष्वेलन्तो विनदन्तश्च जग्मुर्वै दक्षिणां दिशम् ॥ ५० ॥
वानरास्त्वरितं यान्ति सर्वे युद्धाभिनन्दिनः ।

सुमोक्षयिषवः सीतां मुहूर्तं क्वापि नासत ॥ ५१ ॥
ते सह्यं समतिक्रम्य मलयं च महागिरिम् ।
आसेदुरानुपूर्व्येण समुद्रं भीमनिस्वनम् ॥ ५२ ॥
अथ धौतोपलतलां तोयौघैः सहसोत्थितैः ।
वेलामासाद्य विपुलां रामो वचनमब्रवीत् ॥ ५३ ॥
"एते वयमनुप्राप्ताः सुग्रीव ! वरुणालयम् ।
इहेदानीं विचिन्ता सा या नः पूर्वं समुत्थिता ॥ ५४ ॥
अतः परमतीरोऽयं सागरः सरितां पतिः ।
न चायमनुपायेन शक्यस्तरितुमर्णवः ॥ ५५ ॥
तदिहैव निवेशोऽस्तु मन्त्रः प्रस्तूयतामिति ।
यथेदं वानरबलं परं पारमवाप्नुयात्" ॥ ५६ ॥
इतीव स महाबाहुः सीताहरणकर्शितः ।
रामः सागरमासाद्य वासमाज्ञापयत्तदा ॥ ५७ ॥
रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः ।
सेनां न्यवेशयत्तीरे सागरस्य द्रुमायुते ॥ ५८ ॥
निविष्टायां तु सेनायां तीरे नदनदीपतेः ।
पार्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत् ॥ ५९ ॥
"शोकश्च किल कालेन गच्छता ह्यपगच्छति ।
मम चापश्यतः कान्तामहन्यहनि वर्धते ॥ ६० ॥
तन्मे दहति गात्राणि विषं पीतमिवाशये ।
हा नाथेति प्रिया सा मे ह्रियमाणा यदब्रवीत् ॥ ६१ ॥
कदा नु खलु सुश्रोणीं शतपत्रायतेक्षणाम् ।

विजित्य शत्रून् द्रक्ष्यामि सीतां स्फीतामिव श्रियम् ॥ ६२ ॥
सा नूनमसितापाङ्गी रक्षोमध्यगता सती ।
मन्नाथा नाथहीनेव त्रातारं नाधिगच्छति ॥ ६३ ॥
कथं जनकराजस्य दुहिता सा मम प्रिया ।
राक्षसी मध्यगा शेते स्नुषा दशरथस्य च ॥ ६४ ॥
स्वभावतनुका नूनं शोकेनानशनेन च ।
भूयस्तनुतरा सीता देशकालविपर्ययात्" ॥ ६५ ॥
एवं विलपतस्तस्य तत्र रामस्य धीमतः ।
दिनक्षयान्मन्दरुचिर्भास्करोऽस्तमुपागमत् ॥ ६६ ॥
आश्वासितो लक्ष्मणेन रामः सन्ध्यामुपासत ।
स्मरन् कमलपत्राक्षीं सीतां शोकाकुलीकृतः ॥ ६७ ॥
लङ्कायां तु कृतं कर्म घोरं दृष्ट्वा भयावहम् ।
राक्षसेन्द्रो हनुमता शक्रेणेव महात्मना ।
अब्रवीद्राक्षसान् सर्वान् ह्रिया किंचिदवाङ्मुखः ॥ ६८ ॥
"धर्षिता च प्रविष्टा च लङ्का दुष्प्रसहा पुरी ।
तेन वानरमात्रेण दृष्टा सीता च जानकी ।
प्रासादो धर्षितश्चैत्यः प्रबला राक्षसा हताः ॥ ६९ ॥
किं करिष्यामि भद्रं वः किं वा युक्तमनन्तरम् ।
उच्यतां नः समर्थं यत्कृतं च सुकृतं भवेत् ॥ ७० ॥
मन्त्रमूलं हि विजयं प्राहुरार्या मनस्विनः ।
तस्माद्वै रोचये मन्त्रं रामं प्रति महाबलाः ॥ ७१ ॥
वानराणां हि वीराणां सहस्रैः परिवारितः ।

रामोऽभ्येति पुरीं लङ्कामस्माकमुपरोधकः ॥ ७२ ॥
तरिष्यति च सुव्यक्तं राघवः सागरं सुखम् ।
तरसा युक्तरूपेण सानुजः सबलानुगः ।
समुद्रमुच्छोषयति वीर्येणान्यत्करोति वा ॥ ७३ ॥
अस्मिन्नेवं गते कार्ये विरुद्धे वानरैः सह ।
हितं पुरे च सैन्ये च सर्वं संमन्त्र्यतां मम" ॥ ७४ ॥
इत्युक्त्वा राक्षसेन्द्रेण राक्षसास्ते महाबलाः ।
ऊचुः प्राञ्जलयः सर्वे रावणं राक्षसेश्वरम् ॥ ७५ ॥
"द्विषत्पक्षमविज्ञाय नीतिबाह्यास्त्वबुद्धयः ।
अविज्ञायात्मपक्षं च राजानं भीषयन्ति हि ॥ ७६ ॥
राजन्! परिघशक्त्यृष्टिशूलपट्टससंकुलम् ।
सुमहन्नो बलं कस्माद्विषादं भजते भवान् ॥ ७७ ॥
त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि ॥ ७८ ॥
कैलासशिखरावासी यक्षैर्बहुभिरावृतः ।
सुमहत्कदनं कृत्वा वश्यस्ते धनदः कृतः ॥ ७९ ॥
वासुकिस्तक्षकः शङ्खो जटा च वशमाहृताः ।
अक्षया बलवन्तश्च शूरा लब्धवराः पुरा ॥ ८० ॥
निर्जिताः समरे रोषाल्लोकपाला महाबलाः ।
देवलोकमितो गत्वा शक्रश्चापि विनिर्जितः ॥ ८१ ॥
क्षत्रियैर्बहुभिर्वीरैः शक्रतुल्यपराक्रमैः ।
आसीद्वसुमती पूर्णा महद्भिरिव पादपैः ॥ ८२ ॥
तेषां वीर्यगुणोत्साहैर्न समो राघवो रणे ।

प्रसह्य ते त्वया राजन्! हताः परमदुर्जयाः ॥ ८३ ॥
तिष्ठ वा किं महाराज! श्रमेण तव वानरान्।
अयमेको महाबाहुरिन्द्रजित्क्षपयिष्यति ॥ ८४ ॥
अनेन हि महाराज! माहेश्वरमनुत्तमम्।
इष्ट्वा यज्ञं वरो लब्धो लोके परमदुर्लभः ॥ ८५ ॥
राजन्नापद्युक्तेयमागता प्राकृताज्जनात्।
हृदि नैव त्वया कार्या त्वं वधिष्यसि राघवम्" ॥ ८६ ॥
ततो निकुम्भो रभसः सूर्यशत्रुर्महाबलः।
सुप्तघ्नो यज्ञहा रक्षो महापार्श्वो महोदरः ॥ ८७ ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान्।
इन्द्रजिच्च महातेजा बलवान् रावणात्मजः ॥ ८८ ॥
परिघान्पट्टसान्प्रासाञ्शक्तिशूलपरश्वधान्।
चापानि च सबाणानि खड्गांश्च विपुलाँञ्शितान् ॥ ८९ ॥
प्रगृह्य परमक्रुद्धाः समुत्पत्य च राक्षसाः।
अब्रुवन् रावणं सर्वे प्रदीप्ता इव तेजसा ॥ ९० ॥
"अद्य रामं वधिष्यामः सुग्रीवं च सलक्ष्मणम्।
कृपणं च हनूमन्तं लङ्का येन प्रधर्षिता" ॥ ९१ ॥
तान्गृहीतायुधान्सर्वान्वारयित्वा विभीषणः।
अब्रवीत्प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥ ९२ ॥
"अप्युपायैस्त्रिभिस्तात! योऽर्थः प्राप्तुं न शक्यते।
तस्य विक्रमकालांस्तान् युक्तानाहुर्मनीषिणः ॥ ९३ ॥
प्रमत्तेष्वभियुक्तेषु दैवेन प्रहतेषु च।

विक्रमास्तात! सिध्यन्ति परीक्ष्य विधिना कृताः ॥ ९४ ॥
अप्रमत्तं कथं तं तु विजिगीषुं बले स्थितम्।
जितरोषं दुराधर्षं प्रधर्षयितुमिच्छथ ॥ ९५ ॥
समुद्रं लङ्घयित्वा तु घोरं नदनदीपतिम्।
गतं हनुमतो लोके को विन्द्यात् तर्कयेत वा ॥ ९६ ॥
बलान्यपरिमेयाणि वीर्याणि च निशाचराः!।
परेषां सहसाऽवज्ञा न कर्तव्या कथञ्चन ॥ ९७ ॥
अयशस्यमनायुष्यं परदाराभिमर्शनम्।
अर्थक्षयकरं घोरं पापस्य च पुनर्भवम् ॥ ९८ ॥
एतन्निमित्तं वैदेही भयं नः सुमहद्भवेत्।
आहृता सा परित्याज्या कलहार्थे कृतेन किम् ॥ ९९ ॥
न नः क्षमं वीर्यवता तेन धर्मानुवर्तिना।
वैरं निरर्थकं कर्तुं दीयतामस्य मैथिली ॥ १०० ॥
यावन्न सगजां साश्वां बहुरत्नसमाकुलाम्।
पुरीं दारयते बाणैर्दीयतामस्य मैथिली ॥ १०१ ॥
यावत्सुघोरा महती दुर्धर्षा हरिवाहिनी।
नावस्कन्दति नो लङ्कां दीयतामस्य मैथिली ॥ १०२ ॥
विनश्येद्धि पुरी लङ्का शूराः सर्वे च राक्षसाः।
रामस्य दयिता पत्नी स्वयं यदि न दीयते ॥ १०३ ॥
प्रसादये त्वां बन्धुत्वात्कुरुष्व वचनं मम।
हितं तथ्यमहं ब्रूमि दीयतामस्य मैथिली ॥ १०४ ॥
यदाप्रभृति वैदेही संप्राप्तेमां पुरीं तव।

तदाप्रभृति दृश्यन्ते निमित्तान्यशुभानि नः ॥ १०५ ॥
अवश्यं च मया वाच्यं यद्दृष्टमपि वा श्रुतम् ।
संप्रधार्य यथान्यायं तद्भवान् कर्तुमर्हति" ॥ १०६ ॥
स तां परिषदं कृत्स्नां समीक्ष्य समितिंजयः ।
सुखेप्सुः सुहृदां मध्ये व्याजहार स रावणः ॥ १०७ ॥
"सर्वकृत्यानि युष्माभिः समारब्धानि सर्वदा ।
मन्त्रकर्मनियुक्तानि न जातु विफलानि मे ॥ १०८ ॥
ससोमग्रहनक्षत्रैर्मरुद्भिरिव वासवः ।
भवद्भिरहमत्यर्थं वृतः श्रियमवाप्नुयाम् ॥ १०९ ॥
अहं तु खलु सर्वान् वः समर्थयितुमुद्यतः ।
कुम्भकर्णस्य तु स्वप्नान्नेममर्थमचोदयम् ॥ ११० ॥
अयं हि सुप्तः षण्मासान् कुम्भकर्णो महाबलः ।
सर्वशस्त्रभृतां मुख्यः स इदानीं समुत्थितः ॥ १११ ॥
इयं च दण्डकारण्याद्रामस्य महिषी प्रिया ।
रक्षोभिश्चरिताद्देशादानीता जनकात्मजा ॥ ११२ ॥
सा मे न शय्यामारोढुमिच्छत्यलसगामिनी ।
त्रिषु लोकेषु चान्या मे न सीता सदृशी मता ॥ ११३ ॥
तनुमध्या पृथुश्रोणी शारदेन्दुनिभानना ।
हेमबिम्बनिभा सौम्या मायेव मयनिर्मिता ॥ ११४ ॥
हुताग्नेरग्निसंकाशामेनां सौरीमिव प्रभाम् ।
दृष्ट्वा सीतां विशालाक्षीं कामस्य वशमेयिवान् ॥ ११५ ॥
सा तु संवत्सरं कालं मामयाचत भामिनी ।

प्रतीक्षमाणा भर्तारं राममायतलोचना ॥ ११६ ॥
तन्मया चारुनेत्रायाः प्रतिज्ञातं वचः शुभम् ।
श्रान्तोऽहं सततं कामाद्यातो हय इवाध्वनि ॥ ११७ ॥
मानुषान्मे भयं नास्ति तथाऽपि तु विमृश्यताम् ।
तदा देवासुरे युद्धे युष्माभिः सहितोऽजयम् ॥ ११८ ॥
अदेया च यथा सीता वध्यौ दशरथात्मजौ ।
भवद्भिर्मन्त्र्यतां मन्त्रः सुनीतिश्चाभिधीयताम्" ॥ ११९ ॥
तस्य कामपरीतस्य निशम्य परिदेवितम् ।
कुम्भकर्णः प्रचुक्रोध वचनं चेदमब्रवीत् ॥ १२० ॥
"सर्वमेतन्महाराज! कृतमप्रतिमं तव ।
विधीयेत सहास्माभिरादावेवास्य कर्मणः ॥ १२१ ॥
न्यायेन राजा कार्याणि यः करोति दशानन! ।
न स संतप्यते पश्चान्निश्चितार्थमतिर्नृपः ॥ १२२ ॥
अनुपायेन कर्माणि विपरीतानि यानि च ।
क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ १२३ ॥
यः पश्चात्पूर्वकार्याणि कुरुते बुद्धिमोहितः ।
पूर्वं चोत्तरकार्याणि न स वेद नयानयौ ॥ १२४ ॥
त्वयेदं महदारब्धं कार्यमप्रतिचिन्तितम् ।
दिष्ट्या त्वां नावधीद्रामो विषमिश्रमिवामिषम् ॥ १२५ ॥
तस्मात्त्वया समारब्धं कर्म ह्यप्रतिमं परैः ।
अहं समीकरिष्यामि हत्वा शत्रूंस्तवानघ! ॥ १२६ ॥
गिरिमात्रशरीरस्य शितशूलधरस्य च ।

नर्दतस्तीक्ष्णदंष्ट्रस्य बिभियाद्वै पुरंदरः” ॥ १२७ ॥
रावणं क्रुद्धमाज्ञाय महापार्श्वो महाबलः ।
मुहूर्तमनुसञ्चिन्त्य प्राञ्जलिर्वाक्यमब्रवीत् ॥ १२८ ॥
“ईश्वरस्येश्वरः कोऽस्ति तव शत्रुनिबर्हण! ।
रमस्व सह वैदेह्या शत्रूनाक्रम्य मूर्धसु ॥ १२९ ॥
बलात्कुक्कुटवृत्तेन वर्तस्व सुमहाबल! ।
आक्रम्य सीतां वैदेहीं तथा भुङ्क्ष्व रमस्व च ॥ १३० ॥
लब्धकामस्य ते पश्चादागमिष्यति यद्भयम् ।
प्राप्तमप्राप्तकालं वा सर्वं प्रतिसहिष्यसि ॥ १३१ ॥
इह प्राप्तान् वयं सर्वाञ्शत्रूंस्तव महाबल! ।
वशे शस्त्रप्रपातेन करिष्यामो न संशयः” ॥ १३२ ॥
एवमुक्तस्तदा राजा महापार्श्वेन रावणः ।
तस्य संपूजयन् वाक्यमिदं वचनमब्रवीत् ॥ १३३ ॥
“महापार्श्व! निबोध त्वं रहस्यं किंचिदात्मनः ।
चिरवृत्तं तदाख्यास्ये यदवाप्तं मया पुरा ॥ १३४ ॥
पितामहस्य भवनं गच्छन्तीं पुञ्जिकस्थलाम् ।
चञ्चूर्यमाणामद्राक्षमाकाशेऽग्निशिखामिव ॥ १३५ ॥
सा प्रसह्य मया भुक्ता कृता विवसना ततः ।
स्वयंभूभवनं प्राप्ता लोलिता नलिनी यथा ॥ १३६ ॥
तस्य तच्च तदा मन्ये ज्ञातमासीन्महात्मनः ।
अथ संकुपितो वेधा मामिदं वाक्यमब्रवीत् ॥ १३७ ॥
अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि ।

तदा ते शतधा मूर्धा फलिष्यति न संशयः ॥ १३८ ॥
इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम् ।
नारोपये बलात्सीतां वैदेहीं शयने स्वके ॥ १३९ ॥
सागरस्येव मे वेगो मारुतस्येव मे गतिः ।
नैतद्दाशरथिर्वेद ह्यासादयति तेन माम् ॥ १४० ॥
न मत्तो निर्गतान् बाणान् द्विजिह्वानिव पन्नगान् ।
रामः पश्यति संग्रामे तेनमामभिगच्छति ॥ १४१ ॥
क्षिप्रं वज्रोपमैर्बाणैः शतधा कार्मुकच्युतैः ।
राममादीपयिष्यामि उल्काभिरिव कुञ्जरम्" ॥ १४२ ॥
निशाचरेन्द्रस्य निशम्य वाक्यं स कुम्भकर्णस्य च गर्जितानि ।
विभीषणो राक्षसराजमुख्यमुवाच वाक्यं हितमर्थयुक्तम् ॥ १४३ ॥
"वृतो हि बाह्वन्तरभोगराशिश्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः ।
पञ्चाङ्गुलीपञ्चशिरोऽतिकायः सीतामहाहिस्तव केन राजन्! ॥ १४४ ॥
यावन्न लङ्कां समभिद्रवन्ति वलीमुखाः पर्वतकूटमात्राः ।
दंष्ट्रायुधाश्चैव नखायुधाश्च प्रदीयतां दाशरथाय मैथिली ॥ १४५ ॥
न कुम्भकर्णेन्द्रजितौ च राजन्! तथा महापार्श्वमहोदरौ वा ।
निकुम्भकुम्भौ च तथाऽतिकायः स्थातुं न शक्ता युधि राघवस्य ॥
जीवंस्तु रामस्य न मोक्ष्यसे त्वं गुप्तः सवित्राऽप्यथ वा मरुद्भिः ।
न वासवस्याङ्कगतो न मृत्योर्न खं न पातालमनुप्रविष्टः" ॥ १४७ ॥
निशम्य वाक्यं तु विभीषणस्य ततः प्रहस्तो वचनं बभाषे ।
"न नो भयं विद्म न दैवतेभ्यो न दानवेभ्यो ह्यथवा कुतश्चित् ॥
न यक्षगन्धर्वमहोरगेभ्यो भयं न संख्ये पतगोत्तमेभ्यः ।

कथं नु रामाद्भविता भयं नो नरेन्द्रपुत्रात्समरे कदाचित् " ॥ १४९ ॥
प्रहस्तवाक्यं त्वहितं निशम्य विभीषणो राजहितानुकांक्षी ।
ततो महार्थं वचनं बभाषे धर्मार्थकामेषु निविष्टबुद्धिः ॥ १५० ॥
प्रहस्त! राजा च महोदरश्च त्वं कुम्भकर्णश्च यदर्थजातम् ।
ब्रवीथ रामं प्रति तन्न शक्यं यथागतिः स्वर्गमधर्मबुद्धेः ॥ १५१ ॥
वधस्तु रामस्य मया त्वया वा प्रहस्त! सर्वैरपि राक्षसैर्वा ।
कथं भवेदर्थविशारदस्य महार्णवं तर्तुमिवाप्लवस्य ॥ १५२ ॥
धर्मप्रधानस्य महारथस्य इक्ष्वाकुवंशप्रभवस्य राज्ञः ।
प्रहस्त! देवाश्च तथाविधस्य कृत्येषु शक्तस्य भवन्ति मूढाः ॥ १५३ ॥
तीक्ष्णा न तावत्तव कङ्कपत्रा दुरासदा राघवविप्रमुक्ताः ।
भित्वा शरीरं प्रविशन्ति बाणाः प्रहस्त! तेनैव विकत्थसे त्वम् ॥
न रावणो नातिबलस्त्रिशीर्षो न कुम्भकर्णोऽस्य सुतो निकुम्भः ।
न चेन्द्रजिद्दाशरथिं प्रसोढुं त्वं वा रणे शक्रसमं समर्थाः ॥ १५५ ॥
अयं हि राजा व्यसनाभिभूतो मित्रैरमित्रप्रतिमैर्भवद्भिः ।
अन्वास्यते राक्षसनाशनाय तीक्ष्णः प्रकृत्या ह्यसमीक्ष्यकारी ॥ १५६ ॥
इदं पुरस्यास्य सराक्षसस्य राज्ञश्च पथ्यं ससुहृज्जनस्य ।
सम्यग्घि वाक्यं सततं ब्रवीमि नरेन्द्रपुत्राय ददाम पत्नीम्" ॥ १५७ ॥
बृहस्पतेस्तुल्यमतेर्वचस्तन्निशम्य यत्नेन विभीषणस्य ।
ततो महात्मा वचनं बभाषे तत्रेन्द्रजिन्नैरृतयोधमुख्यः ॥ १५८ ॥
किं नाम ते तात! कनिष्ठवाक्यमनर्थकं चैव सुभीतवच्च ।
अस्मिन्कुले योऽपि भवेन्न जातः सोऽपीदृशं नैव वदेन्न कुर्यात् ॥
सत्वेन वीर्येण पराक्रमेण शौर्येण धैर्येण च तेजसा च ।

एकः कुलेऽस्मिन् पुरुषो विमुक्तो विभीषणस्तात! कनिष्ठ एषः ॥
किं नाम तौ राक्षस! राजपुत्रावस्माकमेकेन हि राक्षसेन ।
सुप्राकृतेनापि रणे निहन्तुं शक्यौ कुतो भीषयसे स्म भीरो! ॥
त्रिलोकनाथो ननु देवराजः शक्रो मया भूमितले निविष्टः ।
भयार्दिताश्चापि दिशः प्रपन्नाः सर्वे तथा देवगणाः समग्राः ॥ १६२ ॥
सोऽहं सुराणामपि दर्पहन्ता दैत्योत्तमानामपि शोकदाता ।
कथं नरेन्द्रात्मजयोर्न शक्तो मनुष्ययोः प्राकृतयोः सुवीर्यः" ॥ १६३ ॥
अथेन्द्रकल्पस्य दुरासदस्य महौजसस्तद्वचनं निशम्य ।
ततो महार्थं वचनं बभाषे विभीषणः शस्त्रभृतां वरिष्ठः ॥ १६४ ॥
न तात! मन्त्रे तव निश्चयोऽस्ति बालस्त्वमद्याप्यविपक्वबुद्धिः ।
तस्मात्त्वया ह्यात्मविनाशनाय वचोऽर्थहीनं बहु विप्रलप्तम् ॥ १६५ ॥
पुत्रप्रवादेन तु रावणस्य त्वमिन्द्रजिन्मित्रमुखोऽसि शत्रुः ।
यस्येदृशं राघवतो विनाशं निशम्य मोहादनुमन्यसे त्वम् ॥ १६६ ॥
को ब्रह्मदण्डप्रतिमप्रकाशानर्चिष्मतः कालनिकाशरूपान् ।
सहेत बाणान् यमदण्डकल्पान् समीक्ष्य मुक्तान् युधि राघवेण ॥
धनानि रत्नानि विभूषणानि वासांसि दिव्यानि मणींश्च चित्रान् ।
सीतां च रामाय निवेद्य देवीं वसेम राजन्निह वीतशोकाः ॥ १६८ ॥
सुनिविष्टं हितं वाक्यमुक्तवन्तं विभीषणम् ।
अब्रवीत्परुषं वाक्यं रावणः कालचोदितः ॥ १६९ ॥
"वसेत्सह सपत्नेन क्रुद्धेनाशीविषेण वा ।
न तु मित्रप्रवादेन संवसेच्छत्रुसेविना ॥ १७० ॥
जानामि शीलं ज्ञातीनां सर्वलोकेषु राक्षस! ।

हृष्यन्ति व्यसनेष्वेते ज्ञातीनां ज्ञातयः सदा ॥ १७१ ॥
नित्यमन्योन्यसंहृष्टा व्यसनेष्वाततयिनः ।
प्रच्छन्नहृदया घोरा ज्ञातयस्तु भयावहाः ॥ १७२ ॥
विद्यते गोषु संपन्नं विद्यते ब्राह्मणे दमः ।
विद्यते स्त्रीषु चापल्यं विद्यते ज्ञातितो भयम् ॥ १७३ ॥
यथा पुष्करपर्णेषु पतितास्तोयबिन्दवः ।
न श्लेषमुपगच्छन्ति तथाऽनार्येषु सौहृदम् ॥ १७४ ॥
अन्यस्त्वेवंविधं ब्रूयाद्वाक्यमेतन्निशाचर! ।
अस्मिन् मुहूर्ते न भवेत्त्वां तु धिक्कुलपांसनम्" ॥ १७५ ॥
इत्युक्तः परुषं वाक्यं न्यायवादी विभीषणः ।
उत्पपात गदापाणिश्चतुर्भिस्सह राक्षसैः ॥ १७६ ॥
अब्रवीच्च तदा वाक्यं जातक्रोधो विभीषणः ।
अन्तरिक्षगतः श्रीमान् भ्रातरं राक्षसाधिपम् ॥ १७७ ॥
"स त्वं भ्राताऽसि मे राजन्! ब्रूहि मां यद्यदिच्छसि ।
ज्येष्ठो मान्यः पितृसमो न च धर्मपथे स्थितः ॥ १७८ ॥
सुहितं हितकामेन वाक्यमुक्तं दशानन! ।
न गृण्हन्त्यकृतात्मानः कालस्य वशमागताः ॥ १७९ ॥
सुलभाः पुरुषा राजन्! सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ १८० ॥
दीप्तपावकसंकाशैः शितैः काञ्चनभूषणैः ।
न त्वमिच्छाम्यहं द्रष्टुं रामेण निहतं शरैः ॥ १८१ ॥
शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे ।

कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ १८२ ॥
आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम् ।
स्वस्ति तेऽस्तु गमिष्यामि सुखी भव मया विना" ॥ १८३ ॥
इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः ।
आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः ॥ १८४ ॥
तमात्मपञ्चमं दृष्ट्वा सुग्रीवो वानराधिपः ।
वानरैः सह दुर्धर्षश्चिन्तयामास बुद्धिमान् ॥ १८५ ॥
चिन्तयित्वा मुहूर्तं तु वानरांस्तानुवाच ह ।
हनुमत्प्रमुखान् सर्वानिदं वचनमुत्तमम् ॥ १८६ ॥
"एष सर्वायुधोपेतः चतुर्भिः सह राक्षसैः ।
राक्षसोऽभ्येति पश्यध्वमस्मान् हन्तुं न संशयः" ॥ १८७ ॥
सुग्रीवस्य वचः श्रुत्वा सर्वे ते वानरोत्तमाः ।
सालानुद्यम्य शैलांश्च इदं वचनमब्रुवन् ॥ १८८ ॥
"शीघ्रं व्यादिश नो राजन्! वधायैषां दुरात्मनाम् ।
निपतन्ति हता यावद्धरण्यामल्पतेजसः" ॥ १८९ ॥
तेषां संभाषमाणानामन्योन्यं स विभीषणः ।
उत्तरं तीरमासाद्य खस्थ एव व्यतिष्ठत । ॥ १९० ॥
उवाच च महाप्राज्ञः स्वरेण महता महान् ।
सुग्रीवं तांश्च संप्रेक्ष्य सर्वान् वानरयूथपान् ॥ १९१ ॥
"रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः ।
तस्याहमनुजो भ्राता विभीषण इति श्रुतः ॥ १९२ ॥
तेन सीता जनस्थानाध्दृता हत्वा जटायुषम् ।

रुद्धा च विवशा दीना राक्षसीभिः सुरक्षिता ॥ १९३ ॥
तमहं हेतुभिर्वाक्यैर्विविधैश्च न्यदर्शयम् ।
साधु निर्यात्यतां सीता रामायेति पुनः पुनः ॥ १९४ ॥
स च न प्रतिजग्राह रावणः कालचोदितः ।
उच्यमानं हितं वाक्यं विपरीत इवौषधम् ॥ १९५ ॥
सोऽहं परुषितस्तेन दासवच्चावमानितः ।
त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः ॥ १९६ ॥
सर्वलोकशरण्याय राघवाय महात्मने ।
निवेदयत मां क्षिप्रं विभीषणमुपस्थितम्" ॥ १९७ ॥
एतत्तु वचनं श्रुत्वा सुग्रीवो लघुविक्रमः ।
लक्ष्मणस्याग्रतो रामं संरब्धमिदमब्रवीत् ॥ १९८ ॥
"रावणस्यानुजो भ्राता विभीषण इति श्रुतः ।
चतुर्भिः सह रक्षोभिः भवन्तं शरणं गतः ॥ १९९ ॥
मन्त्रे व्यूहे नये चारे युक्तो भवितुमर्हसि ।
वानराणां च भद्रं ते परेषां च परंतप! ॥ २०० ॥
अन्तर्धानगता ह्येते राक्षसाः कामरूपिणः ।
शूराश्च निकृतिज्ञाश्च तेषु जातु न विश्वसेत् ॥ २०१ ॥
प्रकृत्या राक्षसो ह्येष भ्राताऽमित्रस्य वै प्रभो! ।
आगतश्च रिपोः पक्षात्कथमस्मिन् हि विश्वसेत् ॥ २०२ ॥
रावणेन प्रणिहितं तमवेहि विभीषणम् ।
तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर! ॥ २०३ ॥
राक्षसो जिह्मया बुध्या संदिष्टोऽयमुपस्थितः ।

प्रहर्तुं मायया च्छन्नो विश्वस्ते त्वयि राघव ! ॥ २०४ ॥
वध्यतामेष दण्डेन तीव्रेण सचिवैः सह ।
रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः" ॥ २०५ ॥
सुग्रीवस्य तु तद्वाक्यं श्रुत्वा रामो महायशाः ।
समीपस्थानुवाचेदं हनुमत्प्रमुखान् हरीन् ॥ २०६ ॥
"यदुक्तं कपिराजेन रावणावरजं प्रति ।
वाक्यं हेतुमदर्थ्यं च भवद्भिरपि तच्छ्रुतम् ॥ २०७ ॥
सुहृदा ह्यर्थकृच्छ्रेषु युक्तं बुद्धिमता सता ।
समर्थेनापि संदेष्टुं शाश्वतीं भूतिमिच्छता" ॥ २०८ ॥
इत्येवं परिपृष्टास्ते स्वं स्वं मतमतन्द्रिताः ।
सोपचारं तदा राममूचुर्हितचिकीर्षवः ॥ २०९ ॥
"अज्ञातं नास्ति ते किंचित्त्रिषु लोकेषु राघव ! ।
आत्मानं सूचयन् राम ! पृच्छस्यस्मान् सुहृत्तया ॥ २१० ॥
त्वं हि सत्यव्रतः शूरो धार्मिको दृढविक्रमः ।
परीक्ष्यकारी स्मृतिमान्निसृष्टात्मा सुहृत्सु च ॥ २११ ॥
तस्मादेकैकशस्तावत् ब्रुवन्तु सचिवास्तव ।
हेतुतो मतिसंपन्नाः समर्थाश्च पुनः पुनः" ॥ २१२ ॥
इत्युक्ते राघवायाथ मतिमानङ्गदोऽग्रतः ।
विभीषणपरीक्षार्थमुवाच वचनं हरिः ॥ २१३ ॥
"शत्रोः सकाशात्संप्राप्तः सर्वथा शङ्क्य एव हि ।
विश्वासयोग्यः सहसा न कर्तव्यो विभीषणः" ॥ २१४ ॥
जाम्बवांस्त्वथ संप्रेक्ष्य शास्त्रबुध्या विचक्षणः ।

वाक्यं विज्ञापयामास गुणवद्दोषवर्जितम् ॥ २१५ ॥
"बद्धवैराच्च पापाच्च राक्षसेन्द्राद्विभीषणः ।
अदेशकाले संप्राप्तः सर्वथा शङ्क्यतामयम्" ॥ २१६ ॥
ततो मैन्दस्तु संप्रेक्ष्य नयापनयकोविदः ।
वाक्यं वचनसंपन्नो बभाषे हेतुमत्तरम् ॥ २१७ ॥
"भावमस्य तु विज्ञाय ततस्तत्वं करिष्यसि
यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ!" ॥ २१८ ॥
अथ संस्कारसंपन्नो हनूमान् सचिवोत्तमः ।
उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु ॥ २१९ ॥
"न भवन्तं मतिश्रेष्ठं समर्थं वदतां वरम् ।
अतिशाययितुं शक्तो बृहस्पतिरपि ब्रुवन् ॥ २२० ॥
न वादान्नापि सङ्घर्षान्नाधिक्यान्न च कामतः ।
वक्ष्यामि वचनं राजन्! यथार्थं राम! गौरवात् ॥ २२१ ॥
दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि ।
युक्तमागमनं तस्य सदृशं तस्य बुद्धितः ॥ २२२ ॥
न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावता ।
प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः ॥ २२३ ॥
अशङ्कितमतिः स्वस्थो न शठः परिसर्पति ।
न चास्य दुष्टा वाक् चापि तस्मान्नास्तीह संशयः ॥ २२४ ॥
आकारश्छाद्यमानोऽपि न शक्यो विनिगूहितुम् ।
बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥ २२५ ॥
उद्योगं तव संप्रेक्ष्य मिथ्यावृत्तं च रावणम् ।

बालिनश्च वधं श्रुत्वा सुग्रीवं चाभिषेचितम् ॥ २२६ ॥
राज्यं प्रार्थयमानश्च बुद्धिपूर्वमिहागतः ।
एतावत्तु पुरस्कृत्य युज्यते त्वस्य संग्रहः ॥ २२७ ॥
यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति ।
त्वं प्रमाणं तु शेषस्य श्रुत्वा बुद्धिमतां वर! ॥ २२८ ॥
अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य ह ।
प्रत्यभाषत दुर्धर्षः श्रुतवानात्मनि स्थितम् ॥ २२९ ॥
"मित्रभावेन संप्राप्तं न त्यजेयं कथंचन ।
दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम् ॥ २३० ॥
सुग्रीवस्त्वथ तद्वाक्यमाभाष्य च विमृश्य च ।
ततः शुभतरं वाक्यमुवाच हरिपुंगवः ॥ २३१ ॥
"सुदुष्टो वाऽप्यदुष्टो वा किमेष रजनीचरः ।
ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत् ।
को नाम स भवेत्तस्य यमेष न परित्यजेत्" ॥ २३२ ॥
वानराधिपतेर्वाक्यं श्रुत्वा सर्वानुदीक्ष्य च ।
इति होवाच काकुत्स्थो वाक्यं सत्यपराक्रमः ॥ २३३ ॥
"न सर्वे भ्रातरस्तात! भवन्ति भरतोपमाः ।
मद्विधा वा पितुः पुत्राः सुहृदो वा भवद्विधाः ॥ २३४ ॥
सुदुष्टो वाऽप्यदुष्टो वा किमेष रजनीचरः ।
सूक्ष्ममप्यहितं कर्तुं ममाशक्तः कथंचन ॥ २३५ ॥
पिशाचान् दानवान् यक्षान् पृथिव्यां चैव राक्षसान् ।
अङ्गुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर! ॥ २३६ ॥

श्रूयते हि कपोतेन शत्रुः शरणमागतः ।
अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ २३७ ॥
स हि तं प्रतिजग्राह भार्याहर्तारमागतम् ।
कपोतो वानरश्रेष्ठ! किं पुनर्मद्विधो जनः ॥ २३८ ॥
ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा ।
शृणु गाथां पुरा गीतां धर्मिष्ठां सत्यवादिना ॥ २३९ ॥
बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् ।
न हन्यादानृशंस्यार्थमपि शत्रुं परंतप! ॥ २४० ॥
आर्तो वा यदि वा दृप्तः परेषां शरणागतः ।
अरिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मना ॥ २४१ ॥
तं चेद्भयाद्वा मोहाद्वा कामाद्वापि न रक्षति ।
स्वया शक्त्या यथान्यायं तत्पापं लोकगर्हितम् ॥ २४२ ॥
विनष्टः पश्यतो यस्यारक्षिणः शरणागतः ।
आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः ॥ २४३ ॥
एवं दोषो महानत्र प्रपन्नानामरक्षणे ।
अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनम् ॥ २४४ ॥
करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम् ।
धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात्तु फलोदये ॥ २४५ ॥
सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ २४६ ॥
आनयैनं हरिश्रेष्ठ! दत्तमस्याभयं मया ।
विभीषणो वा सुग्रीव! यदि वा रावणः स्वयम् ॥ २४७ ॥

रामस्य तु वचः श्रुत्वा सुग्रीवः प्लवगेश्वरः ।
प्रत्यभाषत काकुत्स्थं सौहार्देनाभिचोदितः ॥ २४८ ॥
"किमत्र चित्रं धर्मज्ञ! लोकनाथ! सुखावह! ।
यत्त्वमार्यं प्रभाषेथाः सत्त्ववान् सत्पथे स्थितः ॥ २४९ ॥
मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् ।
अनुमानाच्च भावाच्च सर्वतः सुपरीक्षितः ॥ २५० ॥
तस्मात्क्षिप्रं सहास्माभिस्तुल्यो भवतु राघव! ।
विभीषणो महाप्राज्ञः सखित्वं चाभ्युपैतु नः" ॥ २५१ ॥
राघवेणाभये दत्ते संनतो रावणानुजः ।
खात्पपातावनीं हृष्टो भक्तैरनुचरैः सह ॥ २५२ ॥
स तु रामस्य धर्मात्मा निपपात विभीषणः ।
पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः ॥ २५३ ॥
अब्रवीच्च तदा रामं वाक्यं तत्र विभीषणः ।
धर्मयुक्तं च युक्तं च मनसः संप्रहर्षणम् ॥ २५४ ॥
"अनुजो रावणस्याहं तेन चास्म्यवमानितः ।
भवन्तं सर्वभूतानां शरण्यं शरणागतः ॥ २५५ ॥
परित्यक्ता मया लङ्का मित्राणि च धनानि च ।
भवद्गतं मे राज्यं च जीवितं च सुखानि च ॥ २५६ ॥
इति ब्रुवाणं रामस्तु परिष्वज्य विभीषणम् ।
अब्रवील्लक्ष्मणं प्रीतः "समुद्राज्जलमानय ॥ २५७ ॥
तेन चैनं महाप्राज्ञमभिषिञ्च विभीषणम् ।
राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद!" ॥ २५८ ॥

एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद्विभीषणम् ।
मध्ये वानरमुख्यानां राजानं रामशासनात् ॥ २५९ ॥
तं प्रसादं तु रामस्य दृष्ट्वा सद्यः प्लवङ्गमाः ।
प्रचुक्रुशुर्महात्मानं साधु साध्विति चाब्रुवन् ॥ २६० ॥
अब्रवीच्च हनूमांस्तं सुग्रीवश्च विभीषणम् ।
"कथं सागरमक्षोभ्यं तराम वरुणालयम् ॥ २६१ ॥
उपायं नाधिगच्छामो यथा नदनदीपतिम् ।
तराम तरसा सर्वे ससैन्या वरुणालयम्" ॥ २६२ ॥
एवमुक्तस्तु धर्मज्ञः प्रत्युवाच विभीषणः ।
"समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥ २६३ ॥
खानितः सगरेणायमप्रमेयो महोदधिः ।
कर्तुमर्हति रामस्य ज्ञातेः कार्यं महोदधिः" ॥ २६४ ॥
एवं विभीषणेनोक्तो राक्षसेन विपश्चिता ।
आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः ॥ २६५ ॥
ततश्चाख्यातुमारेभे विभीषणवचः शुभम् ।
सुग्रीवो विपुलग्रीवः सागरस्योपवेशनम् ॥ २६६ ॥
स लक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरम् ।
सत्क्रियार्थं क्रियादक्षः स्मितपूर्वमभाषत ॥ २६७ ॥
"विभीषणस्य मन्त्रोऽयं मम लक्ष्मण! रोचते ।
ब्रूहि त्वं सहसुग्रीवस्तवापि यदि रोचते" ॥ २६८ ॥
एवमुक्तौ तु तौ वीरावुभौ सुग्रीवलक्ष्मणौ ।
समुदाचारसंयुक्तमिदं वचनमूचतुः ॥ २६९ ॥

"किमर्थं नौ नरव्याघ्र! न रोचिष्यति राघव!
विभीषणेन यच्चोक्तमस्मिन् काले सुखावहम् ॥ २७० ॥
अबध्वा सागरे सेतुं घोरेऽस्मिन् वरुणालये ।
लङ्का नासादितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ २७१ ॥
अलं कालात्ययं कृत्वा समुद्रोऽयं नियुज्यताम् ।
यथा सैन्येन गच्छेम पुरीं रावणपालिताम्" ॥ २७२ ॥
ततो निविष्टां ध्वजिनीं सुग्रीवेणाभिपालिताम् ।
ददर्श राक्षसोऽभ्येत्य शार्दूलो नाम वीर्यवान् ॥ २७३ ॥
चारो राक्षसराजस्य रावणस्य दुरात्मनः ।
प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ २७४ ॥
"एष वानरऋक्षौघो लङ्कां समभिवर्तते ।
अगाधश्चाप्रमेयश्च द्वितीय इव सागरः ॥ २७५ ॥
पुत्रौ दशरथस्येमौ भ्रातरौ रामलक्ष्मणौ ।
उत्तमायुधसंपन्नौ सीतायाः पदमागतौ ॥ २७६ ॥
तत्त्वभूतं महाराज! क्षिप्रं वेदितुमर्हसि ।
उपप्रदानं सान्त्वं वा भेदो वाऽत्र प्रयुज्यताम् ॥ २७७ ॥
शार्दूलस्य वचः श्रुत्वा रावणो राक्षसेश्वरः ।
उवाच सहसा व्यग्रः संप्रधार्यार्थमात्मनः ॥ २७८ ॥
शुकं नाम तदा रक्षो वाक्यमर्थविदां वरम् ।
सुग्रीवं ब्रूहि गत्वा त्वं राजानं वचनान्मम ॥ २७९ ॥
"अहं यद्यहरं भार्यां राजपुत्रस्य धीमतः ।
किं तत्र तव सुग्रीव! किष्किन्धां प्रति गम्यताम् ॥ २८० ॥

न हीयं हरिभिर्लङ्का शक्या प्राप्तुं कथंचन ।
देवैरपि सगन्धर्वैः किं पुनर्नरवानरैः" ॥ २८१ ॥
स तथा राक्षसेन्द्रेण सन्दिष्टो रजनीचरः ।
शुको विहङ्गमो भूत्वा तूर्णमाप्लुत्य चाम्बरम् ॥ २८२ ॥
स गत्वा दूरमध्वानमुपर्युपरि सागरम् ।
संस्थितोऽह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत् ।
सर्वमुक्तं यथादिष्टं रावणेन दुरात्मना ॥ २८३ ॥
तं प्रापयन्तं वचनं तूर्णमाप्लुत्य वानराः ।
प्रापद्यन्त दिवं क्षिप्रं लोप्तुं हन्तुं च मुष्टिभिः ॥ २८४ ॥
गगनाद् भूतले चाशु परिगृह्य निपातितः ।
वानरैः पीड्यमानस्तु शुको वचनमब्रवीत् ॥ २८५ ॥
"न दूतान् घ्नन्ति काकुत्स्थ! वार्यन्तां साधु वानराः" ॥ २८६ ॥
शुकस्य वचनं श्रुत्वा रामस्तु परिदेवितम्
उवाच मा वधिष्टेति घ्नतः शाखामृगर्षभान् । ॥ २८७ ॥
ततः सागरवेलायां दर्भानास्तीर्य राघवः ।
अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधिम् ॥ २८८ ॥
स त्रिरात्रोषितस्तत्र नयज्ञो धर्मवत्सलः ।
उपासत तदा रामः सागरं सरितां पतिम् ॥ २८९ ॥
न च दर्शयते मन्दस्तदा रामस्य सागरः ।
प्रयतेनापि रामेण यथार्हमभिपूजितः ॥ २९० ॥
समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलोचनः ।
समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम् ।

"अवलेपः समुद्रस्य न दर्शयति यत्स्वयम् ॥ २९१ ॥
प्रशमश्च क्षमाचैव आर्जवं प्रियवादिता ।
असामर्थ्यफला ह्येते निर्गुणेषु सतां गुणाः ॥ २९२ ॥
आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम् ।
सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम् ॥ २९३ ॥
न साम्ना शक्यते कीर्तिर्न साम्ना शक्यते यशः ।
प्राप्तुं लक्ष्मण! लोकेऽस्मिञ्जयो वा रणमूर्धनि ॥ २९४ ॥
क्षमया हि समायुक्तं मामयं मकरालयः ।
असमर्थं विजानाति धिक् क्षमामीदृशे जने ॥ २९५ ॥
चापमानय सौमित्रे! शरांश्चाशीविषोपमान् ।
समुद्रं शोषयिष्यामि पद्भ्यां यान्तु प्लवङ्गमाः" ॥ २९६ ॥
एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः ।
बभूव रामो दुर्धर्षो युगान्ताग्निरिव ज्वलन् ॥ २९७ ॥
ब्राह्मेणास्त्रेण संयोज्य ब्रह्मदण्डनिभं शरम् ।
संयोज्य धनुषि श्रेष्ठे विचकर्ष महाबलः ॥ २९८ ॥
तस्मिन् विकृष्टे सहसा राघवेण शरासने ।
रोदसी संपफालेव पर्वताश्च चकम्पिरे ॥ २९९ ॥
तमश्च लोकमाववे दिशश्च न चकाशिरे ।
परिचुक्षुभिरे चाशु सरांसि सरितस्तथा ॥ ३०० ॥
सहसाऽभूत्ततो वेगाद्भीमवेगो महोदधिः ।
योजनं व्यतिचक्राम वेलामन्यत्र संप्लवात् ॥ ३०१ ॥
ततो मध्यात्समुद्रस्य सागरः स्वयमुत्थितः ।

स्निग्धवैदूर्यसंकाशो जाम्बूनदविभूषितः ॥ ३०२ ॥
रक्तमाल्याम्बरधरः पद्मपत्रनिभेक्षणः ।
सर्वपुष्पमयीं दिव्यां शिरसा धारयन् स्रजम् ॥ ३०३ ॥
सागरः समुपक्रम्य पूर्वमामन्त्र्य वीर्यवान् ।
अब्रवीत्प्राञ्जलिर्वाक्यं राघवं शरपाणिनम् ॥ ३०४ ॥
"पृथिवी वायुराकाशमापो ज्योतिश्च राघव ! ।
स्वभावे सौम्य ! तिष्ठन्ति शाश्वतं मार्गमास्थिताः ॥ ३०५ ॥
तत्स्वभावो ममाप्येषः यदगाधोऽहमप्लवः ।
विकारस्तु भवेद्गाधः एतत्ते वेदयाम्यहम् ॥ ३०६ ॥
ग्राहनक्राकुलजलं स्तम्भयेयं कथंचन ।
विधास्ये येन गन्ताऽसि विषहिष्ये ह्यहं तथा ॥ ३०७ ॥
अयं सौम्य नलो नाम तनुजो विश्वकर्मणः ।
पित्रा दत्तवरः श्रीमान् प्रतिमो विश्वकर्मणा ॥ ३०८ ॥
एष सेतुं महोत्साहः करोतु मयि वानरः ।
तमहं धारयिष्यामि तथा ह्येष यथा पिता" ॥ ३०९ ॥
एवमुक्त्वोदधिर्नष्टः समुत्थाय नलस्तदा ।
अब्रवीद्वानरश्रेष्ठो वाक्यं रामं महाबलः ॥ ३१० ॥
"अहं सेतुं करिष्यामि विस्तीर्णे वरुणालये ।
पितुः सामर्थ्यमास्थाय तत्वमाह महोदधिः ॥ ३११ ॥
समर्थश्चाप्यहं सेतुं कर्तुं वै वरुणालये ।
काममद्यैव बध्नन्तु सेतुं वानरपुंगवाः" ॥ ३१२ ॥
ततोऽतिसृष्टा रामेण सर्वतो हरियूथपाः ।

अभिप्रेतुर्महारण्यं हृष्टाः शतसहस्रशः ॥ ३१३ ॥
ते नगान्नगसंकाशाः शाखामृगगणर्षभाः ।
बभञ्जुर्वानरास्तत्र प्रचकर्षुश्च सागरम् ॥ ३१४ ॥
ते सालैश्चाश्वकर्णैश्च धवैर्वंशैश्च वानराः ।
कुटजैरर्जुनैस्तालैस्तिलकैस्तिनिशैरपि ॥ ३१५ ॥
बिल्वैश्च सप्तपर्णैश्च कर्णिकारैश्च पुष्पितैः ।
चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन् ॥ ३१६ ॥
हस्तिमात्रान् महाकायाः पाषाणांश्च महाबलाः ।
पर्वतांश्च समुत्पाट्य यन्त्रैः परिवहन्ति च ॥ ३१७ ॥
वानराः शतशस्तत्र रामस्याज्ञापुरस्सराः ।
मेघाभैः पर्वताग्रैश्च तृणैः काष्ठैर्बबन्धिरे ॥ ३१८ ॥
शिलानां क्षिप्यमाणानां शैलानां च निपात्यताम् ।
बभूव तुमुलः शब्दस्तदा तस्मिन् महोदधौ ॥ ३१९ ॥
स वानरवरः श्रीमान् विश्वकर्मात्मजो बली ।
बबन्ध सागरे सेतुं यथा चास्य पिता तथा ॥ ३२० ॥
दशयोजनविस्तीर्णं शतयोजनमायतम् ।
ददृशुर्देवगन्धर्वा नलसेतुं सुदुष्करम् ॥ ३२१ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
बध्नन्तः सागरे सेतुं जग्मुः पारं महोदधेः ॥ ३२२ ॥
अग्रतस्तस्य सैन्यस्य श्रीमान् रामः सलक्ष्मणः ।
जगाम धन्वी धर्मात्मा सुग्रीवेण समन्वितः ॥ ३२३ ॥
घोषेण महता तस्य सिन्धोर्घोषं समुच्छ्रितम् ।

भीममन्तर्दधे भीमा तरन्ती हरिवाहिनी ॥ ३२४ ॥
वानराणां हि सा तीर्णा वाहिनी नलसेतुना ।
तीरे निविविशे राज्ञो बहुमूलफलोदके ॥ ३२५ ॥
मोचितो रामवाक्येन वानरैश्चाभिपीडितः ।
शुकः परमसंत्रस्तो रक्षोधिपमुपागमत् ॥ ३२६ ॥
रावणः प्रहसन्नेव शुकं वाक्यमभाषत ।
"किमिमौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे ।
कच्चिन्नानेकचित्तानां तेषां त्वं वशमागतः" ॥ ३२७ ॥
ततः स भयसंविग्नस्तथा राज्ञाऽभिचोदितः ।
वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम् ॥ ३२८ ॥
"सागरस्योत्तरे तीरेऽब्रवं ते वचनं तथा ।
यथा संदेशमक्लिष्टं सान्त्वयञ्श्लक्ष्णया गिरा ॥ ३२९ ॥
क्रुद्धैस्तैरहमुत्प्लुत्य दृष्टमात्रैः प्लवंगमैः ।
गृहीतोऽस्म्यपि चारब्धो हन्तुं लोप्तुं च मुष्टिभिः ॥ ३३० ॥
नैव संभाषितुं शक्याः संप्रश्नोऽत्र न लभ्यते ।
प्रकृत्या कोपनास्तीक्ष्णा वानरा राक्षसाधिप! ॥ ३३१ ॥
स वै हन्ता विराधस्य कबन्धस्य खरस्य च ।
सुग्रीवसहितो रामः सीतायाः पदमागतः ॥ ३३२ ॥
स कृत्वा सागरे सेतुं तीर्त्वा च लवणोदधिम् ।
एष रक्षांसि निर्धूय धन्वी तिष्ठति राघवः ॥ ३३३ ॥
ऋक्षवानरमुख्यानामनीकानि सहस्रशः ।
गिरिमेघनिकाशानां छादयन्ति वसुन्धराम् ॥ ३३४ ॥

पुरा प्राकारमायान्ति क्षिप्रमेकतरं कुरु ।
सीतां वास्मै प्रयच्छाशु युद्धं वाऽपि प्रदीयताम्" ॥ ४३५ ॥
शुकस्य वचनं श्रुत्वा रावणो वाक्यमब्रवीत् ।
रोषसंरक्तनयनो निर्दहन्निव चक्षुषा ॥ ३३६ ॥
"यदि मां प्रतियुध्येरन् देवगन्धर्वदानवाः ।
नैव सीतां प्रयच्छामि सर्वलोकभयादपि ॥ ३३७ ॥
कदा नामाभिधावन्ति राघवं मामकाः शराः ।
वसन्ते पुष्पितं मत्ता भ्रमरा इव पादपम् ॥ ३३८ ॥
कदा तूणीशयैर्दीप्तैर्गणशः कार्मुकच्युतैः ।
शरैरादीपयाम्येनमुल्काभिरिव कुञ्जरम् ॥ ३३९ ॥
यच्चास्य बलमादास्ये बलेन महता वृतः ।
ज्योतिषामिव सर्वेषां प्रभामुद्यन् दिवाकरः ॥ ३४० ॥
सागरस्येव मे वेगो मारुतस्येव मे गतिः ।
न हि दाशरथिर्वेद तेन मां योद्धुमिच्छति ॥ ३४१ ॥
न मे तूणीशयान् बाणान् सविषानिव पन्नगान् ।
रामः पश्यति संग्रामे तेन मां योद्धुमिच्छति ॥ ३४२ ॥
न जानाति पुरा वीर्यं मम युद्धे स राघवः ।
मम चापमयीं वीणां शरकोणैः प्रवादिताम्" ॥ ३४३ ॥
"भवन्तौ वानरं सैन्यं प्रविश्यानुपलक्षितौ ।
परिमाणं च वीर्यं च ये च मुख्याः प्लवङ्गमाः ॥ ३४४ ॥
रामस्य व्यवसायं च वीर्यं प्रहरणानि च ।
लक्ष्मणस्य च वीरस्य तत्वतो ज्ञातुमर्हथः ॥ ३४५ ॥

इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ ।
हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम् ॥ ३४६ ॥
ततस्तद्वानरं सैन्यमचिन्त्यं रोमहर्षणम् ।
संख्यातुं नाध्यगच्छेतां तदा तौ शुकसारणौ ॥ ३४७ ॥
तौ ददर्श महातेजाः प्रतिच्छन्नौ विभीषणः ।
आचचक्षेऽथ रामाय गृहीत्वा शुकसारणौ ॥ ३४८ ॥
"तस्येमौ राक्षसेन्द्रस्य मन्त्रिणौ शुकसारणौ ।
लंकायाः समनुप्राप्तौ चारौ परपुरंजय!" ॥ ३४९ ॥
तौ दृष्ट्वा व्यथितौ रामं निराशौ जीविते तदा ।
कृताञ्जलिपुटौ भीतौ वचनं चेदमूचतुः ॥ ३५० ॥
"आवामिहागतौ सौम्य! रावणप्रहितावुभौ ।
परिज्ञातुं बलं कृत्स्नं तवेदं रघुनन्दन!" ॥ ३५१ ॥
तयोस्तद्वचनं श्रुत्वा रामो दशरथात्मजः ।
अब्रवीत् प्रहसन् वाक्यं सर्वभूतहिते रतः ॥ ३५२ ॥
"यदि दृष्टं बलं कृत्स्नं वयं वा सुपरीक्षिताः ।
यथोक्तं वा कृतं कार्यं छन्दतः प्रतिगम्यताम् ॥ ३५३ ॥
अथ किंचिददृष्टं वा भूयस्तद्द्रष्टुमर्हथः ।
विभीषणो वा कार्त्स्न्येन भूयः सन्दर्शयिष्यति ॥ ३५४ ॥
न चेदं ग्रहणं प्राप्य भेतव्यं जीवितं प्रति ।
न्यस्तशस्त्रौ गृहीतौ वा न दूतौ वधमर्हथः ॥ ३५५ ॥
प्रविश्य नगरीं लङ्कां भवद्भ्यां धनदानुजः ।
वक्तव्यो रक्षसां राजा यथोक्तं वचनं मम ॥ ३५६ ॥

"यद्बलं च समाश्रित्य सीतां मे हृतवानसि ।
तद्दर्शय यथाकामं ससैन्यः सहबान्धवः ॥ ३५७ ॥
श्वः कल्ये नगरीं लङ्कां सप्राकारां सतोरणाम् ।
रक्षसां च बलं पश्य शरैर्विध्वंसितं मया" ॥ ३५८ ॥
इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ ।
आगम्य नगरीं लङ्कामब्रूतां राक्षसाधिपम् ॥ ३५९ ॥
"विभीषणगृहीतौ तु वधार्हौ राक्षसेश्वर! ।
दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा ॥ ३६० ॥
रामो दाशरथिः श्रीमान् लक्ष्मणश्च विभीषणः ।
सुग्रीवश्च महातेजा महेन्द्रसमविक्रमः ॥ ३६१ ॥
एते शक्ताः पुरीं लङ्कां सप्राकारां सतोरणाम् ।
उत्पाट्य संक्रामयितुं सर्वे तिष्ठन्तु वानराः ॥ ३६२ ॥
यादृशं तस्य रामस्य रूपं प्रहरणानि च ।
वधिष्यति पुरीं लङ्कामेकस्तिष्ठन्तु ते त्रयः ॥ ३६३ ॥
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी ।
बभूव दुर्धर्षतरा सेन्द्रैरपि सुरासुरैः ॥ ३६४ ॥
प्रहृष्टरूपा ध्वजिनी वनौकसां महात्मनां संप्रति योध्दुमिच्छताम् ।
अलं विरोधेन शमो विधीयतां प्रदीयतां दाशरथाय मैथिली" ॥
तद्वचः पथ्यमक्लीबं सारणेनाभिभाषितम् ।
निशम्य रावणो राजा प्रत्यभाषत सारणम् ॥ ३६६ ॥
"यदि मामभियुञ्जीरन् देवगन्धर्वदानवाः ।
नैव सीतां प्रदास्यामि सर्वलोकभयादपि ।

को हि नाम सपत्नो मां समरे जेतुमर्हति" । ॥ ३६७ ॥
इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः ।
भर्त्सयामास तौ वीरौ कथान्ते शुकसारणौ ॥ ३६८ ॥
"न तावत्सदृशं नाम सचिवैरुपजीविभिः ।
विप्रियं नृपतेर्वक्तुं निग्रहप्रग्रहे प्रभोः ॥ ३६९ ॥
आचार्या गुरवो वृद्धा वृथा वां पर्युपासिताः ।
सारं यद्राजशास्त्राणामनुजीव्यं न गृह्यते ॥ ३७० ॥
किं नु मृत्योर्भयं नास्ति? वक्तुं मां परुषं वचः ।
यस्य मे शासतो जिह्वा प्रयच्छति शुभाशुभम् ॥ ३७१ ॥
अप्येव दहनं स्पृष्ट्वा वने तिष्ठन्ति पादपाः ।
राजदोषपरामृष्टास्तिष्ठन्ते नापराधिनः ॥ ३७२ ॥
अपध्वंसत गच्छध्वं संनिकर्षादितो मम ।
न हि वां हन्तुमिच्छामि स्मराम्युपकृतानि वाम्" ॥ ३७३ ॥
एवमुक्तौ तु सव्रीडौ तावुभौ शुकसारणौ ।
रावणं जयशब्देन प्रतिनन्द्याभिनिःसृतौ ॥ ३७४ ॥
अब्रवीच्च दशग्रीवः समीपस्थं महोदरम् ।
"उपस्थापय मे शीघ्रं चारान्नीतिविशारदान्" ॥ ३७५ ॥
महोदरस्तथोक्तस्तु शीघ्रमाज्ञापयच्चरान् ।
ततश्चाराः संत्वरिताः प्राप्ताः पार्थिवशासनात् ॥ ३७६ ॥
तानब्रवीत्ततो वाक्यं रावणो राक्षसाधिपः ।
चारान् प्रत्यायितान् शूरान् भक्तान् विगतसाध्वसान् ॥ ३७७ ॥
"इतो गच्छत रामस्य व्यवसायं परीक्षथ ।

विज्ञाय निपुणं सर्वमागन्तव्यमशेषतः" ॥ ३७८ ॥
चारास्तु ते तथेत्युक्त्वा प्रहृष्टा राक्षसेश्वरम् ।
कृत्वा प्रदक्षिणं जग्मुर्यत्र रामः सलक्ष्मणः ॥ ३७९ ॥
प्रेक्षमाणाश्चमूं तां च बभूवुर्भयविक्लवाः ।
विभीषणेन तत्रस्था निगृहीता यदृच्छया ॥ ३८० ॥
शार्दूलो ग्राहितस्त्वेको पापोऽयमिति राक्षसः ।
मोचितः सोऽपि रामेण वध्यमानः प्लवङ्गमैः ॥ ३८१ ॥
आनृशंस्येन रामस्य मोचिता राक्षसाः परे ।
पुनर्लङ्कामनुप्राप्ताः श्वसन्तो नष्टचेतसः ॥ ३८२ ॥
ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः ।
सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ ३८३ ॥
चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् ।
जातोद्वेगोऽभवत्किंचित् शार्दूलं वाक्यमब्रवीत् ॥ ३८४ ॥
"अयथावच्च ते वर्णो दीनश्चासि निशाचर! ।
नासि कच्चिदमित्राणां क्रुद्धानां वशमागतः" ॥ ३८५ ॥
इति तेनानुशिष्टस्तु वाचं मन्दमुदीरयत् ।
तदा राक्षसशार्दूलं शार्दूलो भयविह्वलः ॥ ३८६ ॥
"न ते चारयितुं शक्या राजन्! वानरपुङ्गवाः ।
विक्रान्ता बलवन्तश्च राघवेण च रक्षिताः ॥ ३८७ ॥
नापि संभाषितुं शक्याः संप्रश्नोऽत्र न लभ्यते ।
सर्वतो रक्ष्यते पन्था वानरैः पर्वतोपमैः ॥ ३८८ ॥
प्रविष्टमात्रे ज्ञातोऽहं बले तस्मिन्नचारिते ।

बलाद् गृहीतो रक्षोभिः बहुधाऽस्मि विचालितः ॥ ३८९ ॥
हरिभिर्वध्यमानश्च याचमानः कृताञ्जलिः ।
राघवेण परित्रातो मा मेति च यदृच्छया ॥ ३९० ॥
एष शैलैः शिलाभिश्च पूरयित्वा महार्णवम् ।
द्वारमाश्रित्य लङ्काया रामस्तिष्ठति सायुधः ।
गारुडं व्यूहमास्थाय सर्वतो हरिभिर्वृतः ॥ ३९१ ॥
पुरा प्राकारमायाति क्षिप्रमेकतरं कुरु ।
सीतां वाऽस्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम्" ॥ ३९२ ॥
मनसा तं तदा प्रेक्ष्य तच्छ्रुत्वा राक्षसाधिपः ।
शार्दूलं सुमहद्वाक्यमथोवाच स रावणः ॥ ३९३ ॥
"यदि मां प्रतियुध्येरन् देवगन्धर्वदानवाः ।
नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ ३९४ ॥
चारिता भवता सेना केऽत्र शूराः प्लवङ्गमाः ।
कीदृशाः? किंप्रभाः? सौम्या वानरा ये दुरासदाः ॥ ३९५ ॥
कस्य पुत्राश्च पौत्राश्च तत्वमाख्याहि राक्षस!
तथाऽत्र प्रतिपत्स्यामि ज्ञात्वा तेषां बलाबलम्" ॥ ३९६ ॥
अथैवमुक्तः शार्दूलो रावणेनोत्तमश्चरः ।
इदं वचनमारेभे वक्तुं रावणसन्निधौ ॥ ३९७ ॥
"अथर्क्षरजसः पुत्रो युधि राजा सुदुर्जयः ।
गद्गदस्याथ पुत्रोऽत्र जाम्बवानिति विश्रुतः ॥ ३९८ ॥
सुषेणश्चापि धर्मात्मा पुत्रो धर्मस्य वीर्यवान् ।
सौम्यः सोमात्मजश्चात्र राजन्! दधिमुखः कपिः ॥ ३९९ ॥

सुमुखो दुर्मुखश्चात्र वेगदर्शी च वानरः ।
मृत्युर्वानररूपेण नूनं सृष्टः स्वयम्भुवा ॥ ४०० ॥
पुत्रो हुतवहस्याथ नीलः सेनापतिः स्वयम् ।
अनिलस्य च पुत्रोऽत्र हनुमानिति विश्रुतः ॥ ४०१ ॥
नप्ता शक्रस्य दुर्धर्षो बलवानङ्गदो युवा ।
मैन्दश्च द्विविधश्चोभौ बलिनावश्विसम्भवौ । ॥ ४०२ ॥
पुत्रा वैवस्वतस्यात्र पञ्च कालान्तकोपमाः
गजो गवाक्षो गवयः शरभो गन्धमादनः । ॥ ४०३ ॥
दश वानरकोट्यश्च शूराणां युद्धकाङ्क्षिणाम् ।
श्रीमतां देवपुत्राणां शेषं नाख्यातुमुत्सहे ॥ ४०४ ॥
पुत्रो दशरथस्यैष सिंहसंहननो युवा ।
दूषणो निहतो येन खरश्च त्रिशिरास्तथा ॥ ४०५ ॥
नास्ति रामस्य सदृशो विक्रमैर्भुवि कश्चन ।
विराधो निहतो येन कबन्धश्चान्तकोपमः ॥ ४०६ ॥
वक्तुं न शक्तो रामस्य नरः कश्चित् गुणान् क्षितौ ।
जनस्थानगता येन यावन्तो राक्षसाः हताः ॥ ४०७ ॥
लक्ष्मणश्चात्र धर्मात्मा मतङ्गानामिवर्षभः ।
यस्य बाणपथं प्राप्य न जीवेदपि वासवः ॥ ४०८ ॥
श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मसंभवौ ।
वरुणस्य च पुत्रोऽन्यो हेमकूटः प्लवङ्गमः ॥ ४०९ ॥
विश्वकर्मसुतो वीरो नलः प्लवगसत्तमः ।
विक्रान्तो बलवानत्र वसुपुत्रः सुदुर्धरः ॥ ४१० ॥

राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः ।
परिगृह्य पुरीं लङ्कां राघवस्य हिते रतः ॥ ४११ ॥
इति सर्वं समाख्यातं तवेदं वानरं बलम् ।
सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान् गतिः" ॥ ४१२ ॥
ततः स मन्त्रयामास सचिवै राक्षसैः सह ।
विद्युज्जिह्वं च मायाज्ञमब्रवीद्राक्षसाधिपः ॥ ४१३ ॥
"मोहयिष्यावहे सीतां मायया जनकात्मजाम् ।
शिरो मायामयं गृह्य राघवस्य निशाचर! ।
त्वं मां समुपतिष्ठस्व महच्च सशरं धनुः" ॥ ४१४ ॥
एवमुक्तस्तथेत्याह विद्युज्जिह्वो निशाचरः ।
तस्य तुष्टोऽभवद्राजा प्रददौ च विभूषणम् ॥ ४१५ ॥
अशोकवनिकायां तु सीतादर्शनलालसः ।
नैऋतानामधिपतिः संविवेश महाबलः ॥ ४१६ ॥
अधोमुखीं शोकपरामुपविष्टां महीतले ।
भर्तारमेव ध्यायन्तीमशोकवनिकां गताम् ॥ ४१७ ॥
उपसृत्य ततः सीतां प्रहर्षं नाम कीर्तयन् ।
इदं च वचनं धृष्टमुवाच जनकात्मजाम् ॥ ४१८ ॥
"सान्त्व्यमाना मया भद्रे! यमुपाश्रित्य वल्गसे ।
खरहन्ता स ते भर्ता राघवः समरे हतः ॥ ४१९ ॥
छिन्नं ते सर्वतो मूलं दर्पस्ते विहतो मया ।
व्यसनेनात्मनः सीते! मम भार्या भविष्यसि ॥ ४२० ॥
विसृजेमां मतिं मूढे! किं मृतेन करिष्यसि ।

भवस्व भद्रे! भार्याणां सर्वासामीश्वरी भव ॥ ४२१ ॥
अल्पपुण्ये! निवृत्तार्थे! मूढे! पण्डितमानिनि!।
शृणु भर्तृवधं सीते! घोरं वृत्रवधं यथा ॥ ४२२ ॥
समायातः समुद्रान्तं मां हन्तुं किल राघवः।
वानरेन्द्रप्रणीतेन बलेन महता वृतः ॥ ४२३ ॥
तत्प्रहस्तप्रणीतेन बलेन महता मम।
बलमस्य हतं रात्रौ यत्र रामः सलक्ष्मणः ॥ ४२४ ॥
अथ सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना।
असक्तं कृतहस्तेन शिरश्छिन्नं महासिना ॥ ४२५ ॥
विभीषणः समुत्पुत्य निगृहीतो यदृच्छया।
दिशः प्रव्राजितः सर्वैर्लक्ष्मणः प्लवगैः सह ॥ ४२६ ॥
सुग्रीवो ग्रीवया शेते भग्नया प्लवगाधिपः।
निरस्तहनुकः शेते हनूमान् राक्षसैर्हतः ॥ ४२७ ॥
हरयो मथिता नागै रथजातैस्तथापरे।
शायिता मृदिताश्चाश्वैर्वायुवेगैरिवाम्बुदाः ॥ ४२८ ॥
एवं तव हतो भर्ता ससैन्यो मम सेनया।
क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः" ॥ ४२९ ॥
ततः परमदुर्धर्षो रावणो राक्षसाधिपः।
सीतायामुपशृण्वन्त्यां राक्षसीमिदमब्रवीत् ॥ ४३० ॥
"राक्षसं क्रूरकर्माणं विद्युज्जिह्वं त्वमानय।
येन तद्राघवशिरः संग्रामात्स्वयमाहृतम्" ॥ ४३१ ॥
विद्युज्जिह्वस्ततो गृह्य शिरस्तत्सशरासनम्।

प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः ॥ ४३२ ॥
तमब्रवीत्ततो राजा रावणो राक्षसंस्थितम् ।
विद्युज्जिह्वं महाजिह्वं समीपपार्श्ववर्तिनम् ॥ ४३३ ॥
"अग्रतः कुरु सीतायाः शीघ्रं दाशरथेः शिरः ।
अवस्थां पश्चिमां भर्तुः कृपणा साधु पश्यतु" ॥ ४३४ ॥
एवमुक्तं तु तद्रक्षः शिरस्तत्प्रियदर्शनम् ।
उपनिक्षिप्य सीतायाः क्षिप्रमन्तरधीयत ॥ ४३५ ॥
रावणश्चापि चिक्षेप भास्वरं कार्मुकं महत् ।
त्रिषु लोकेषु विख्यातं सीतामिदमुवाच च ॥ ४३६ ॥
"इदं तत्तव रामस्य कार्मुकं ज्यासमायुतम् ।
इह प्रहस्तेनानीतं हत्वा तं निशि मानुषम्" ॥ ४३७ ॥
सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमम् ।
नयने मुखवर्णं च भर्तुस्तत्सदृशं मुखम् ॥ ४३८ ॥
केशान् केशान्तदेशं च तं च चुडामणिं शुभम् ।
जगाम जगतीं बाला छिन्ना तु कदली यथा ॥ ४३९ ॥
सा मुहूर्तात्समाश्वस्य प्रतिलभ्य च चेतनाम् ।
तच्छिरः समुपाघ्राय विललापाऽऽयतेक्षणा ॥ ४४० ॥
"हा हताऽस्मि महाबाहो! वीरव्रतमनुव्रत! ।
इमां ते पश्चिमावस्थां गताऽस्मि विधवा कृता ॥ ४४१ ॥
प्रथमं मरणं नार्या भर्तुर्वैगुण्यमुच्यते ।
सुवृत्त! साधुवृत्तायाः संवृत्तस्त्वं ममाग्रतः ॥ ४४२ ॥
दुःखाद्दुःखं प्रपन्नाया मग्नायाः शोकसागरे ।

यो हि मामुद्यतस्त्रातुं सोऽपि त्वं विनिपातितः ॥ ४४३ ॥
सा श्वश्रूर्मम कौसल्या त्वया पुत्रेण राघव !
वत्सेनेव यथा धेनुर्विवत्सा वत्सला कृता ॥ ४४४ ॥
आदिष्टं दीर्घमायुस्ते दैवज्ञैरपि राघव ! ।
अनृतं वचनं तेषामल्पायुरसि राघव ! ॥ ४४५ ॥
अदृष्टं मृत्युमापन्नः कस्मात्त्वं नयशास्त्रवित् ।
व्यसनानामुपायज्ञः कुशलो ह्यसि वर्जने ॥ ४४६ ॥
अर्चितं सततं यत्तद्गन्धमाल्यैर्मया तव ।
इदं ते मत्प्रियं वीर ! धनुः काञ्चनभूषणम् ॥ ४४७ ॥
किं मां न प्रेक्षसे राजन् !? किं मां न प्रतिभाषसे ? ।
बालां बाल्येन संप्राप्तां भार्यां मां सहचारिणीम् ॥ ४४८ ॥
संश्रुतं गृह्णता पाणिं चरिष्यामीति यत्त्वया ।
स्मर तन्मम काकुत्स्थ ! नय मामपि दुःखिताम् ॥ ४४९ ॥
मम हेतोरनार्याया अनघः पार्थिवात्मजः ।
रामः सागरमुत्तीर्य सत्ववान् गोष्पदे हतः ॥ ४५० ॥
अहं दाशरथेनोढा मोहात्स्वकुलपांसनी ।
आर्यपुत्रस्य रामस्य भार्या मृत्युरजायत ॥ ४५१ ॥
साधु पातय मां क्षिप्रं रामस्योपरि रावण !
समानय पतिं पत्न्या कुरु कल्याणमुत्तमम् ” ॥ ४५२ ॥
इति सा दुःखसन्तप्ता विललापाऽऽयतेक्षणा ।
भर्तुः शिरो धनुस्तत्र समीक्ष्य च पुनः पुनः ॥ ४५३ ॥
एवं लालप्यमानायां सीतायां तत्र राक्षसः ।

अभिचक्राम भर्तारमनीकस्थः कृताञ्जलिः ॥ ४५४ ॥
विजयस्वाऽऽर्यपुत्रेति सोऽभिवाद्य प्रसाद्य च ।
न्यवेदयदनुप्राप्तं प्रहस्तं वाहिनीपतिम् ॥ ४५५ ॥
"अमात्यैः सहितैः सर्वैः प्रहस्तः समुपस्थितः ।
तेन दर्शनकामेन वयं प्रस्थापिताः प्रभो! ॥ ४५६ ॥
नूनमस्ति महाराज! राजभावात्क्षमान्वितम् ।
किंचिदात्ययिकं कार्यं तेषां त्वं दर्शनं कुरु" ॥ ४५७ ॥
एतच्छ्रुत्वा दशग्रीवो राक्षसप्रतिवेदितम् ।
अशोकवनिकां त्यक्त्वा मन्त्रिणां दर्शनं ययौ ॥ ४५८ ॥
अन्तर्धानं तु तच्छीर्षं तच्च कार्मुकमुत्तमम् ।
जगाम रावणस्यैव निर्याणसमनन्तरम् ॥ ४५९ ॥
मोहितां राक्षसेन्द्रेण सीतां परमदुःखिताम् ।
आश्वासयामास तदा सरमा मृदुभाषिणी ॥ ४६० ॥
"समाश्वसिहि वैदेहि! माभूत्ते मनसो व्यथा ।
न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः ।
वधश्च पुरुषव्याघ्रे तस्मिन्नैवोपपद्यते ॥ ४६१ ॥
न त्वेव वानरा हन्तुं शक्याः पादपयोधिनः ।
सुरा देवर्षभेणेव रामेण हि सुरक्षिताः ॥ ४६२ ॥
दीर्घवृत्तभुजः श्रीमान् महोरस्कः प्रतापवान् ।
धन्वी संहननोपेतो धर्मात्मा भुवि विश्रुतः ॥ ४६३ ॥
विक्रान्तो रक्षिता नित्यमात्मनश्च परस्य च ।
लक्ष्मणेन सह भ्रात्रा कुशली नयशास्त्रवित् ॥ ४६४ ॥

अयुक्तिबुद्धिकृत्येन सर्वभूतविरोधिना ।
इयं प्रयुक्ता रौद्रेण माया मायाविदा त्वयि ॥ ४६५ ॥
शोकस्ते विगतः सर्वः कल्याणं त्वामुपस्थितम् ।
ध्रुवं त्वां भजते लक्ष्मीः प्रियं प्रीतिकरं शृणु ॥४६६ ॥
उत्तीर्य सागरं रामः सह वानरसेनया ।
संनिविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ॥ ४६७ ॥
दृष्टो मे परिपूर्णार्थः काकुत्स्थः सहलक्ष्मणः ।
स हि तैः सागरान्तस्थैर्बलैस्तिष्ठति रक्षितः" ॥ ४६८ ॥
इति ब्रुवाणा सरमा राक्षसी सीतया सह ।
सर्वोद्योगेन सैन्यानां शब्दं शुश्राव भैरवम् ॥ ४६९ ॥
दण्डनिर्घातवादिन्याः श्रुत्वा भेर्या महास्वनम् ।
उवाच सरमा सीतामिदं वचनमब्रवीत् ॥ ४७० ॥
"संनाहजननी ह्येषा भैरवा भीरु! भेरिका ।
भेरीनादं च गम्भीरं शृणु तोयदनिस्वनम् ॥ ४७१ ॥
श्रीस्त्वां भजति शोकघ्नी रक्षसां भयमागतम् ।
रामः कमलपत्राक्षो दैत्यानामिव वासवः ॥ ४७२ ॥
विनिर्जित्य जितक्रोधः त्वामचिन्त्यपराक्रमः ।
रावणं समरे हत्वा भर्ता त्वाऽधिगमिष्यति ॥ ४७३ ॥
तस्य दृष्ट्वा मुखं देवि! पूर्णचन्द्रमिवोदितम् ।
मोक्ष्यसे शोकजं वारि निर्मोकमिव पन्नगी ॥ ४७४ ॥
रावणं समरे हत्वा नचिरादेव मैथिलि! ।
त्वया समग्रः प्रियया सुखार्हो लप्स्यते सुखम्" ॥ ४७५ ॥

एतस्मिन्नन्तरे शब्दो भेरीशङ्खसमाकुलः ।
श्रुतो वानरसैन्यानां कम्पयन् धरणीतलम् ॥ ४७६ ॥
तं निनादं निशम्याथ रावणो राक्षसेश्वरः ।
सभां संनादयन् सर्वामित्युवाच महाबलः ॥ ४७७ ॥
"तरणं सागरस्यापि विक्रमं बलसंचयम् ।
यदुक्तवन्तो रामस्य भवन्तस्तन्मया श्रुतम् ॥ ४७८ ॥
भवतश्चाप्यहं वेद्मि युद्धे सत्यपराक्रमान् ।
तूष्णीकानीक्षतोऽन्योन्यं विदित्वा रामविक्रमम्" ॥ ४७९ ॥
ततस्तु सुमहाप्राज्ञो माल्यवान्नाम राक्षसः ।
रावणस्य वचः श्रुत्वा इति मातामहोऽब्रवीत् ॥ ४८० ॥
"विद्यास्वभिविनीतो यो राजा राजन्नयानुगः ।
स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे ॥ ४८१ ॥
संदधानो हि कालेन विगृण्हंश्चारिभिः सह ।
स्वपक्षवर्धनं कुर्वन् महदैश्वर्यमश्नुते ॥ ४८२ ॥
हीयमानेन कर्तव्यो राज्ञा सन्धिः समेन च ।
न शत्रुमवमन्येत ज्यायान् कुर्वीत विग्रहम् ॥ ४८३ ॥
तन्मह्यं रोचते सन्धिः सह रामेण रावण! ।
यदर्थमभियुक्ताः स्म सीता तस्मै प्रदीयताम् ॥ ४८४ ॥
यस्य देवर्षयः सर्वे गन्धर्वाश्च जयैषिणः ।
विरोधं मा गमस्तेन सन्धिस्ते तेन रोचताम् ॥ ४८५ ॥
विष्णुं मन्यामहे रामं मानुषं देहमास्थितम् ।
न हि मानुषमात्रोऽसौ राघवो दृढविक्रमः ॥ ४८६ ॥

येन बद्धः समुद्रस्य स सेतुः परमाद्भुतः ।
कुरुष्व नरराजेन सन्धिं रामेण रावण !" ॥ ४८७ ॥
तत्तु माल्यवतो वाक्यं हितमुक्तं दशाननः ।
न मर्षयति दुष्टात्मा कालस्य वशमागतः ॥ ४८८ ॥
स बद्ध्वा भ्रुकुटिं वक्त्रे क्रोधस्य वशमागतः ।
अमर्षात्परिवृत्ताक्षो माल्यवन्तमथाब्रवीत् ॥ ४८९ ॥
"हितबुद्ध्या यदहितं वचः परुषमुच्यते ।
परपक्षं प्रविश्यैव नैतच्छ्रोत्रं गतं मम ॥ ४९० ॥
मानुषं कृपणं राममेकं शाखामृगाश्रयम् ।
समर्थं मन्यसे केन त्यक्तं पित्रा वनालयम् ॥ ४९१ ॥
रक्षसामीश्वरं मां च देवतानां भयङ्करम् ।
हीनं मां मन्यसे केन ह्यहीनं सर्वविक्रमैः ॥ ४९२ ॥
आनीय च वनात्सीतां पद्महीनामिव श्रियम् ।
किमर्थं प्रतिदास्यामि राघवस्य भयादहम् ॥ ४९३ ॥
वृतं वानरकोटीभिः ससुग्रीवं सलक्ष्मणम् ।
पश्य कैश्चिदहोभिस्त्वं राघवं निहतं मया ॥ ४९४ ॥
द्वन्द्वे यस्य न तिष्ठन्ति दैवतान्यपि संयुगे ।
स कस्माद्रावणो युद्धे भयमाहारयिष्यति ॥ ४९५ ॥
यदि तावत्समुद्रे तु सेतुर्बद्धो यदृच्छया ।
रामेण विस्मयः कोऽत्र येन ते भयमागतम् ॥ ४९६ ॥
स तु तीर्त्वाऽर्णवं रामः सह वानरसेनया ।
प्रतिजानामि ते सत्यं न जीवन् प्रतियास्यति" ॥ ४९७ ॥

एवं ब्रुवाणं संरब्धं रुष्टं विज्ञाय रावणम् ।
व्रीडितो माल्यवान् वाक्यं नोत्तरं प्रत्यपद्यत ॥ ४९८ ॥
जयाशिषा च राजानं वर्धयित्वा यथोचितम् ।
माल्यवानभ्यनुज्ञातो जगाम स्वं निवेशनम् ॥ ४९९ ॥
रावणस्तु सहामात्यो मन्त्रयित्वा विमृष्य च ।
लङ्कायामतुलां गुप्तिं कारयामास राक्षसः ॥ ५०० ॥
अथ तस्मिन्निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः ।
लक्ष्मणं लक्ष्मिसपन्नमिदं वचनमब्रवीत् ॥ ५०१ ॥
"क्षिप्रमद्य दुराधर्षां लङ्कां रावणपालिताम् ।
अभियाम जवेनैव सर्वतो हरिभिर्वृताः" ॥ ५०२ ॥
संनह्य तु ससुग्रीवः कपिराजबलं महत् ।
कालज्ञो राघवः काले संयुगायाभ्यचोदयत् ॥ ५०३ ॥
ततः काले महाबाहुर्बलेन महता वृतः ।
प्रस्थितः पुरतो धन्वी लङ्कामभिमुखः पुरीम् ॥ ५०४ ॥
तं विभीषणसुग्रीवौ हनुमाञ्जाम्बवान् नलः ।
ऋक्षराजस्तथा नीलो लक्ष्मणश्चान्वयुस्तदा ॥ ५०५ ॥
ततः पश्चात्सुमहती पृतनर्क्षवनौकसाम् ।
प्रच्छाद्य महतीं भूमिमनुयाति स्म राघवम् ॥ ५०६ ॥
तौ त्वदीर्घेण कालेन भ्रातरौ रामलक्ष्मणौ ।
रावणस्य पुरीं लङ्कामासेदतुररिन्दमौ ॥ ५०७ ॥
तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदिताः ।
यथानिवेशं संपीड्य न्यविशन्त वनौकसः ॥ ५०८ ॥

वानरैर्बलवद्भिश्च बभूव द्रुमपाणिभिः ।
संवृता सर्वतो लङ्का दुष्प्रवेशापि वायुना ॥ ५०९ ॥
राक्षसा विस्मयं जग्मुः सहसाऽभिनिपीडिताः ।
वानरैर्मेघसंकाशैः शक्रतुल्यपराक्रमैः ॥ ५१० ॥
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी ।
बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः ॥ ५११ ॥
राघवः संनिवेश्यैव सैन्यं स्वं रक्षसां वधे ।
अङ्गदं वालितनयं समाहूयेदमब्रवीत् ॥ ५१२ ॥
"गत्वा सौम्य! दशग्रीवं ब्रूहि मद्वचनात्कपे! ।
लङ्घयित्वा पुरीं लङ्कां भयं त्यक्त्वा गतव्यथः ॥ ५१३ ॥
"भ्रष्टश्रीक! गतैश्वर्य! मुमूर्षो! नष्टचेतन!
ऋषीणां देवतानां च गन्धर्वाप्सरसां तथा ॥ ५१४ ॥
नागानामथ यक्षाणां राज्ञां च रजनीचर! ।
यच्च पापं कृतं मोहादवलिप्तेन राक्षस! ॥ ५१५ ॥
तस्य पापस्य संप्राप्ता व्युष्टिरद्य दुरासदा ।
नूनमद्य गतो दर्पः स्वयम्भूवरदानजः ॥ ५१६ ॥
यस्य दण्डधरस्तेऽहं दाराहरणकर्शितः ।
दण्डं धारयमाणस्तु लङ्काद्वारे व्यवस्थितः ॥ ५१७ ॥
बलेन येन वै सीतां मायया राक्षसाधम! ।
मामतिक्रामयित्वा त्वं हृतवांस्तद्विदर्शय ॥ ५१८ ॥
अराक्षसमिमं लोकं कर्तास्मि निशितैः शरैः ।
न चेच्छरणमभ्येषि मामुपादाय मैथिलीम् ॥ ५१९ ॥

धर्मात्मा रक्षसां श्रेष्ठः संप्राप्तोऽयं विभीषणः ।
लङ्कैश्वर्यं ध्रुवं श्रीमानयं प्राप्नोत्यकण्टकम् ॥ ५२० ॥
न हि राज्यमधर्मेण भोक्तुं क्षणमपि त्वया ।
शक्यं मूर्खसहायेन पापेनाविदितात्मना ॥ ५२१ ॥
युध्यस्व वा धृतिं कृत्वा शौर्यमालम्ब्य राक्षस ! ।
मच्छरैस्त्वं रणे शान्तस्ततः पूतो भविष्यसि ॥ ५२२ ॥
यद्वा विशसि लोकांस्त्रीन् पक्षी भूत्वा मनोजवः ।
मम चक्षुष्पथं प्राप्य न जीवन् प्रतियास्यसि" ॥ ५२३ ॥
इत्युक्तः स तु तारेयो रामेणाक्लिष्टकर्मणा ।
जगामाकाशमाविश्य मूर्तिमानिव हव्यवाट् ॥ ५२४ ॥
सोऽतिपत्य मुहूर्तेन श्रीमान् रावणमन्दिरम् ।
ददर्शासीनमव्यग्रं रावणं सचिवैः सह ॥ ५२५ ॥
ततस्तस्याविदूरे स निपत्य हरिपुंगवः ।
दीप्ताग्निसदृशस्तस्थावङ्गदः कनकाङ्गदः ॥ ५२६ ॥
तद्रामवचनं सर्वमन्यूनाधिकमुत्तमम् ।
सामात्यं श्रावयामास निवेद्यात्मानमात्मना ॥ ५२७ ॥
"दूतोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ।
वालिपुत्रोऽङ्गदो नाम यदि ते श्रोत्रमागतः ॥ ५२८ ॥
आह त्वां राघवो रामः कौसल्यानन्दवर्धनः ।
'निष्पत्य प्रतियुध्यस्व नृशंस ! पुरुषो भव ॥ ५२९ ॥
हन्ताऽस्मि त्वां सहामात्यं सपुत्रज्ञातिबान्धवम् ।
निरुद्विग्नास्त्रयो लोका भविष्यान्ति हते त्वयि ॥ ५३० ॥

देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।
शत्रुमद्योद्धरिष्यामि त्वामृर्षाणां च कण्टकम् ॥ ५३१ ॥
विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि ।
न चेत्सत्कृत्य वैदेहीं प्रणिपत्य प्रदास्यसि" ॥ ५३२ ॥
इत्येवं परुषं वाक्यं ब्रुवाणे हरिपुंगवे ।
अमर्षवशमापन्नो निशाचरगणेश्वरः ॥ ५३३ ॥
ततः स रोषताम्राक्षः शशास सचिवांस्तदा ।
"गृह्यतामेष दुर्मेधा वध्यतामिति चासकृत्" ॥ ५३४ ॥
रावणस्य वचः श्रुत्वा दीप्ताग्निसमतेजसः ।
जगृहुस्तं ततो घोराश्चत्वारो रजनीचराः ॥ ५३५ ॥
ग्राहयामास तारेयः स्वयमात्मानमात्मवान् ।
बलं दर्शयितुं वीरो यातुधानगणे तदा ॥ ५३६ ॥
स तान् बाहुद्वये सक्तानादाय पतगानिव ।
प्रासादं शैलसंकाशमुत्पपाताङ्गदस्तदा ॥ ५३७ ॥
तेऽन्तरिक्षाद्विनिर्धूतास्तस्य वेगेन राक्षसाः ।
भूमौ निपतिताः सर्वे राक्षसेन्द्रस्य पश्यतः ॥ ५३८ ॥
भङ्क्त्वा प्रासादशिखरं नाम विश्राव्य चात्मनः ।
विनद्य सुमहानादमुत्पपात विहायसम् ॥ ५३९ ॥
व्यथयन् राक्षसान् सर्वान् हर्षयंश्चापि वानरान् ।
स वानराणां मध्ये तु रामपार्श्वमुपागतः ॥ ५४० ॥
रामस्तु बहुभिर्हृष्टैर्निनदद्भिः प्लवङ्गमैः ।
वृतो रिपुवधाकाङ्क्षी युद्धायैवाभ्यवर्तत ॥ ५४१ ॥

'जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभिपालितः' ॥ ५४२ ॥
इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
अभ्यधावन्त लङ्कायाः प्राकारं कामरूपिणः ॥ ५४३ ॥
ततः कोपपरीतात्मा रावणो राक्षसेश्वरः ।
निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत्तदा ॥ ५४४ ॥
निष्पतन्ति ततः सैन्या हृष्टा रावणचोदिताः ।
समये पूर्यमाणस्य वेगा इव महोदधेः ॥ ५४५ ॥
ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः ।
निजघ्नुर्वानरान् घोरः कथयन्तः स्वविक्रमान् ॥ ५४६ ॥
वानराश्च महावीर्या राक्षसाञ्जघ्नुराहवे ।
राजञ्जय जयेत्युक्त्वा स्वस्वनामकथान्ततः ॥ ५४७ ॥
तत्रासीत्सुमहद्युद्धं तुमुलं रोमहर्षणम् ।
रक्षसां वानराणां च वीराणां जयमिच्छताम् ॥ ५४८ ॥
आजघानेन्द्रजित्क्रुद्धो वज्रेणेव शतक्रतुः ।
अङ्गदं गदया वीरं शत्रुसैन्यविदारणम् ॥ ५४९ ॥
तस्य काञ्चनचित्राङ्गं रथं साश्वं ससारथिम् ।
जघान समरे श्रीमानङ्गदो वेगवान् कपिः ॥ ५५० ॥
जम्बुमाली रथस्थस्तु रथशक्त्या महाबलः ।
बिभेद समरे क्रुद्धो हनूमन्तं स्तनान्तरे ॥ ५५१ ॥
तस्य तं रथमास्थाय हनूमान् मारुतात्मजः ।
प्रममाथ तलेनाशु सह तेनैव रक्षसा ॥ ५५२॥

निकुम्भस्तु रणे नीलं नीलाञ्जनचयप्रभम् ।
निर्बिभेद शरैस्तीक्ष्णैः करैर्मेघमिवांशुमान् ॥ ५५३ ॥
तस्यैव रथचक्रेण नीलो विष्णुरिवाहवे ।
शिरश्चिच्छेद समरे निकुम्भस्य च सारथेः ॥ ५५४ ॥
विद्युन्माली रथस्थस्तु शरैः काञ्चनभूषणैः ।
सुषेणं ताडयामास ननाद च मुहुर्मुहुः ॥ ५५५ ॥
ततः क्रोधसमाविष्टः सुषेणो हरिपुंगवः ।
शिलां सुमहतीं गृह्य निशाचरमभिद्रवत् ॥ ५५६ ॥
शिलाप्रहाराभिहतो विद्युन्माली निशाचरः ।
निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह ॥ ५५७ ॥
एवं तैर्वानरैः शूरैः शूरास्ते रजनीचराः ।
द्वन्द्वे विमृदितास्तत्र दैत्या इव दिवौकसैः ॥ ५५८ ॥
युध्यतामेव तेषां तु तदा वानररक्षसाम् ।
रविरस्तंगतो रात्रिः प्रवृत्ता प्राणहारिणी ॥ ५५९ ॥
अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम् ।
संप्रवृत्तं निशायुद्धं तदा वानररक्षसाम् ॥ ५६० ॥
राक्षसोऽसीति हरयो हरिश्चासीति राक्षसाः ।
अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे ॥ ५६१ ॥
हतानां स्तनमानानां राक्षसानां च निस्वनः ।
शस्तानां वानराणां च संबभूवातिदारुणः ॥ ५६२ ॥
ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे ।
राममेवाभ्यवर्तन्त संस्पृष्टाः शरवृष्टिभिः ॥ ५६३ ॥

ते तु रामेण बाणोघैः सर्वे मर्मसु ताडिताः ।
युद्धादपसृतास्तत्र सावशेषायुषोऽभवन् ॥ ५६४ ॥
ये त्वन्ये राक्षसा भीमा रामस्याभिमुखे स्थिताः ।
तेऽपि नष्टाः समासाद्य पतङ्गा इव पावकम् ॥ ५६५ ॥
अङ्गदस्तु रणे शत्रुं निहन्तुं समुपस्थितः ।
रावणिं निजघानाशु सारथिं च हयानपि ॥ ५६६ ॥
तत्कर्म वालिपुत्रस्य सर्वे देवाः सहर्षिभिः ।
तुष्टुवुः पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ ॥ ५६७ ॥
ततः प्रहृष्टाः कपयः ससुग्रीवविभीषणाः ।
साधु साध्विति नेदुश्च दृष्ट्वा शत्रुं प्रधर्षितम् ॥ ५६८ ॥
इन्द्रजित्तु तदा तेन निर्जिता भीमकर्मणा ।
संयुगे वालिपुत्रेण क्रोधं चक्रे सुदारुणम् ॥ ५६९ ॥
ब्रह्मदत्तवरो वीरो रावणिः क्रोधमूर्च्छितः ।
अदृश्यो निशितान् बाणान् मुमोचाशनिवर्चसः ॥ ५७० ॥
स रामं लक्ष्मणं चैव घोरैर्नागमयैः शरैः ।
बिभेद समरे क्रुद्धः सर्वगात्रेषु राक्षसः ॥ ५७१ ॥
अदृश्यः सर्वभूतानां कूटयोधी निशाचरः ।
बबन्ध शरबन्धेन भ्रातरौ रामलक्ष्मणौ ॥ ५७२ ॥
बद्धौ तु शरबन्धेन तावुभौ रणमूर्धनि ।
निपेततुर्महेष्वासौ जगत्यां जगतीपती ॥ ५७३ ॥
तौ तु क्रूरेण निहतौ रक्षसा कामरूपिणा ।
असृक् सुस्रुवतुस्तीव्रं जलं प्रस्रवणाविव ॥ ५७४ ॥

अचेष्टौ मन्दनिश्वासौ शोणितौघपरिप्लुतौ ।
शरजालाचितौ स्तब्धौ शयानौ शरतल्पयोः ॥ ५७५ ॥
राघवौ पतितौ दृष्ट्वा शरजालसमावृतौ ।
बभूवुर्व्यथिताः सर्वे वानराः सविभीषणाः ॥ ५७६ ॥
अन्तरिक्षं निरीक्षन्तो दिशः सर्वाश्च वानराः ।
न चैनं मायया छन्नं ददृशू रावणिं रणे ॥ ५७७ ॥
इन्द्राजित्त्वात्मनः कर्म तौ शयानौ समीक्ष्य च ।
उवाच परमप्रीतो हर्षयन् सर्वनैऋतान् ॥ ५७८ ॥
"दूषणस्य च हन्तारौ खरस्य च महाबलौ ।
सादितौ मामकैर्बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ ५७९ ॥
नेमौ मोक्षयितुं शक्यावेतस्मादिषुबन्धनात् ।
सर्वैरपि समागम्य सर्षिसङ्घैः सुरासुरैः ॥ ५८० ॥
यत्कृते चिन्तयानस्य शोकार्तस्य पितुर्मम ।
अस्पृष्ट्वा शयनं गात्रैस्त्रियामा याति शर्वरी ॥ ५८१ ॥
कृत्स्नेयं यत्कृते लङ्का नदी वर्षास्विवाकुला ।
सोऽयं मूलहरोऽनर्थः सर्वेषां निहतो मया ॥ ५८२ ॥
रामस्य लक्ष्मणस्यापि सर्वेषां च वनौकसाम् ।
विक्रमा निष्फलाः सर्वे यथा शरदि तोयदाः" ॥ ५८३ ॥
एवमुक्त्वा तु तान् सर्वान् राक्षसान् परिपार्श्वतः ।
यूथपानपि तान् सर्वांस्ताडयामास रावणिः ॥ ५८४ ॥
एवमुक्तास्तु ते सर्वे राक्षसाः कूटयोधिनः ।
हतो राम इति ज्ञात्वा रावणिं समपूजयन् ॥ ५८५ ॥

रामलक्ष्मणयोर्दृष्ट्वा शरीरे सायकैश्चिते ।
सर्वाणि चाङ्गोपाङ्गानि सुग्रीवं भयमाविशत् ॥ ५८६ ॥
तमुवाच परित्रस्तं वानरेन्द्रं विभीषणः ।
सबाष्पवदनं दीनं शोकव्याकुललोचनम् ॥ ५८७ ॥
"अलं त्रासेन सुग्रीव! बष्पवेगो निगृह्यताम्
एवंप्रायाणि युद्धानि विजयो नास्ति नैष्ठिकः ॥ ५८८ ॥
सशेषभाग्यताऽस्माकं यदि वीर! भविष्यति ।
मोहमेतौ प्रहास्येते महात्मानौ महाबलौ ॥ ५८९ ॥
पर्यवस्थापयात्मानमनाथं मां च वानर!
सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ॥ ५९० ॥
तस्मादुत्सृज्य वैक्लब्यं सर्वकार्यविनाशनम् ।
हितं रामपुरोगाणां सैन्यानामनुचिन्त्यताम् ॥ ५९१ ॥
नैतत्किंचन रामस्य न च रामो मुमूर्षति ।
न ह्येनं हास्यते लक्ष्मीर्दुर्लभा या गतायुषा" ॥ ५९२ ॥
समाश्वास्य तु सुग्रीवं राक्षसेन्द्रो विभीषणः ।
विद्रुतं वानरानीकं तत्समाश्वासयत्पुनः ॥ ५९३ ॥
इन्द्रजित्तु महामायः सर्वसैन्यसमावृतः ।
विवेश नगरीं लङ्कां पितरं चाभ्युपागमत् ॥ ५९४ ॥
तत्र रावणमासीनमभिवाद्य कृताञ्जलिः ।
आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ ॥ ५९५ ॥
उत्पपात ततो हृष्टः पुत्रं च परिषस्वजे ।
रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ ॥ ५९६ ॥

उपाघ्राय स मूर्ध्न्येनं पप्रच्छ प्रीतमानसः ।
पृच्छते च यथावृत्तं पित्रे सर्वं न्यवेदयत् ॥ ५९७ ॥
रावणश्चापि संहृष्टो विसृज्येन्द्रजितं सुतम् ।
आजुहाव ततः सीतारक्षिणी राक्षसीस्तदा ॥ ५९८ ॥
राक्षस्यस्त्रिजटा चैव शासनात्समुपस्थिताः ।
ता उवाच ततो हृष्टो राक्षसी राक्षसाधिपः ॥ ५९९ ॥
"हताविन्द्रजिताऽऽख्यात वैदेह्या रामलक्ष्मणौ ।
पुष्पकं च समारोप्य दर्शयध्वं हतौ रणे ॥ ६०० ॥
यदाश्रयादवष्टब्धा नेयं मामुपतिष्ठति ।
अद्य कालवशं प्राप्तं रणे रामं सलक्ष्मणम् ॥ ६०१ ॥
स्ववेक्ष्य विनिवृत्ताशा चान्यां गतिमपश्यती ।
निरपेक्षा विशालाक्षी मामुपस्थास्यते स्वयम् ॥ ६०२ ॥
ततः पुष्पकमारोप्य सीतां त्रिजटया सह ।
जग्मुर्दर्शयितुं तस्यै राक्षस्यो रामलक्ष्मणौ ॥ ६०३ ॥
विमानेनापि सीता तु गत्वा त्रिजटया सह ।
ददर्श वानराणां तु सर्वं सैन्यं निपातितम् ॥ ६०४ ॥
प्रहृष्टमनसश्चापि ददर्श पिशिताशनान् ।
वानरांश्चापि दुःखार्तान् रामलक्ष्मणपार्श्वतः ॥ ६०५ ॥
ततः सीता ददर्शोभौ शयानौ शरतल्पयोः ।
लक्ष्मणं चापि रामं च विसंज्ञौ शरपीडितौ ॥ ६०६ ॥
भर्तारं निहतं दृष्ट्वा लक्ष्मणं च महाबलम् ।
विललाप भृशं सीता करुणं शोककर्शिता ॥ ६०७ ॥

ऊचुर्लक्षणिनो ये मां पुत्रिण्यविधवेति च ।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ६०८ ॥
यज्वनो महिषीं ये मामूचुः पत्नीं च सत्रिणः ।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ६०९ ॥
ऊचुः संश्रवणे ये मां द्विजाः कार्तान्तिकाः शुभाम् ।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ६१० ॥
वीरपार्थिवपत्नी त्वं ये धन्येति च मां विदुः ।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ६११ ॥
वैधव्यं यान्ति यैर्नार्यो लक्षणैर्भाग्यदुर्लभाः ।
नात्मनस्तानि पश्यामि पश्यन्ती हतलक्षणा ॥ ६१२ ॥
आधिराज्येऽभिषेको मे ब्राह्मणैः पतिना सह ।
कृतान्तकुशलैरुक्तं तत्सर्वं वितथीकृतम् ॥ ६१३ ॥
शोधयित्वा जनस्थानं प्रवृत्तिमुपलभ्य च ।
तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोष्पदे हतौ ॥ ६१४ ॥
ननु वारुणमाग्नेयमैन्द्रं वायव्यमेव च ।
अस्त्रं ब्रह्मशिरश्चैव राघवौ प्रत्यपद्यताम् ॥ ६१५ ॥
अदृश्यमानेन रणे मायया वासवोपमौ ।
मम नाथावनाथाया निहतौ रामलक्ष्मणौ ॥ ६१६ ॥
न हि दृष्टिपथं प्राप्य राघवस्य रणे रिपुः ।
जीवन् प्रतिनिवर्तेत यद्यपि स्यान्मनोजवः ॥ ६१७ ॥
न कालस्यातिभारोऽस्ति कृतान्तश्च सुदुर्जयः ।
यत्र रामः सह भ्रात्रा शेते युधि निपातितः ॥ ६१८ ॥

न शोचामि तथा रामं लक्ष्मणं च महाबलम् ।
नात्मानं जननीं वाऽपि यथा श्वश्रूं तपस्विनीम् ॥ ६१९ ॥
साऽनुचिन्तयते नित्यं समाप्तव्रतमागतम् ।
कदा द्रक्ष्यामि सीतां च लक्ष्मणं च सराघवम्" ॥६२० ॥
परिदेवयमानां तां राक्षसी त्रिजटाऽब्रवीत् ।
"मा विषादं कृथा देवि! भर्ताऽयं तव जीवति ॥ ६२१ ॥
इदं विमानं वैदेहि! पुष्पकं नाम नामतः ।
दिव्यं त्वां धारयेन्नैवं यद्येतौ गतजीवितौ ॥ ६२२ ॥
अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ।
चारित्रसुखशीलत्वात्प्रविष्टाऽसि मनो मम ॥ ६२३ ॥
नेमौ शक्यौ रणे जेतुं सेन्द्रैरपि सुरासुरैः ॥ ६२४ ॥
इदं च सुमहच्चिह्नं शनैः पश्यस्व मैथिलि! ।
निःसंज्ञावप्युभावेतौ नैव लक्ष्मीर्विमुञ्चति ॥ ६२५ ॥
प्रायेण गतसत्वानां पुरुषाणां गतायुषाम् ।
दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम् ॥ ६२६ ॥
त्यज शोकं च मोहं च दुःखं च जनकात्मजे! ।
रामलक्ष्मणयोरर्थे नाद्य शक्यमजीवितुम्" ॥ ६२७ ॥
श्रुत्वा तु वचनं तस्याः सीता सुरसुतोपमा ।
कृताञ्जलिरुवाचेदमेवमस्त्विति मैथिली ॥ ६२८ ॥
विमानं पुष्पकं तत्तु संनिवर्त्य मनोजवम् ।
दीना त्रिजटया सीता लङ्कामेव प्रवेशिता ॥ ६२९ ॥
ततस्त्रिजटया सार्धं पुष्पकादवरुह्य सा ।

अशोकवनिकामेव राक्षसीभिः प्रवेशिता ॥ ६३० ॥
तस्मिन्नन्तरे रामः प्रत्यबुध्यत वीर्यवान् ।
स्थिरत्वात्सत्वयोगाच्च शरैः सन्दानितोऽपि सन् ॥ ६३१ ॥
ततो दृष्ट्वा सरुधिरं विषण्णं गाढमर्पितम् ।
भ्रातरं दीनवदनं पर्यदेवयदातुरः ॥ ६३२ ॥
'किं नु मे सीतया कार्यं किं कार्यं जीवितेन वा ।
शयानं योऽद्य पश्यामि भ्रातरं युधि निर्जितम् ॥ ६३३ ॥
शक्या सीतासमा नारी मर्त्यलोके विचिन्वता ।
न लक्ष्मणसमो भ्राता सचिवः सांपरायिकः ॥ ६३४ ॥
परित्यक्ष्याम्यहं प्राणान् वानराणां तु पश्यताम् ।
यदि पञ्चत्वमापन्नः सुमित्रानन्दवर्धनः ॥ ६३५ ॥
किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम् ।
कथमम्बां सुमित्रां च पुत्रदर्शनलालसाम् ॥ ६३६ ॥
कथं वक्ष्यामि शत्रुघ्नं भरतं च यशस्विनम् ।
मया सह वनं यातो विना तेन गतः पुनः ॥ ६३७ ॥
धिङ्मां दुष्कृतकर्माणमनार्यं यत्कृते ह्यसौ ।
लक्ष्मणः पतितः शेते शरतल्पे गतासुवत् ॥ ६३८ ॥
यथैव मां वनं यान्तमनुयातो महाद्युतिः ।
अहमप्यनुयास्यामि तथैवैनं यमक्षयम् ॥ ६३९ ॥
इष्टबन्धुजनो नित्यं मां च नित्यमनुव्रतः ।
इमामद्य गतोऽवस्थां ममानार्यस्य दुर्नयैः ॥ ६४० ॥
सुरुष्टेनापि वीरेण लक्ष्मणेन न संस्मरे ।

परुषं वाऽप्रियं वाऽपि श्रावितं तु कदाचन ॥ ६४१ ॥
अस्त्रैरस्त्राणि यो हन्याच्छक्रस्यापि महात्मनः ।
सोऽयमुर्व्यां हतः शेते महार्हशयनोचितः ॥ ६४२ ॥
तच्च मिथ्याप्रलप्तं मां प्रवक्ष्यति न संशयः ।
यन्मया न कृतो राजा राक्षसानां विभीषणः ॥ ६४३ ॥
अस्मिन् मुहूर्ते सुग्रीव! प्रतियातुमितोऽर्हसि ।
मत्वा हीनं मया राजन्! रावणोऽभिद्रवेद्बली ॥ ६४४ ॥
कृतं हनुमता कार्यं यदन्यैर्दुष्करं रणे ।
न चातिक्रमितुं शक्यं दैवं सुग्रीव! मानुषैः ॥ ६४५ ॥
यत्तु शक्यं वयस्येन सुहृदा च परंतप! ।
कृतं सुग्रीव! तत्सर्वं भवता धर्मभीरुणा ॥ ६४६ ॥
मित्रकार्यं कृतमिदं भवद्भिर्वानरर्षभाः ।
अनुज्ञाता मया सर्वे यथेष्टं गन्तुमर्हथ" ॥ ६४७ ॥
शुश्रुवुस्तस्य ते सर्वे वानराः परिदेवनम् ।
वर्तयांचक्रुरश्रूणि नेत्रैः कृष्णेतरेक्षणाः ॥ ६४८ ॥
ततः सर्वाण्यनीकानि स्थापयित्वा विभीषणः ।
आजगाम गदापाणिस्त्वरितो यत्र राघवः ॥ ६४९ ॥
विभीषणस्तु रामस्य दृष्ट्वा गात्रं शरैश्चितम् ।
लक्ष्मणस्य च धर्मात्मा बभूव व्यथितेन्द्रियः ॥ ६५० ॥
"इमौ तौ सत्त्वसंपन्नौ विक्रान्तौ प्रियसंयुगौ ।
इमामवस्थां गमितौ राक्षसैः कूटयोधिभिः ॥ ६५१ ॥
भ्रातुः पुत्रेण मे तेन दुष्पुत्रेण दुरात्मना ।

राक्षस्या जिह्मया बुध्या चालितावृजुविक्रमौ ॥ ६५२ ॥
ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया ।
तावुभौ देहनाशाय प्रसुप्तौ पुरुषर्षभौ ॥ ६५३ ॥
जीवन्नद्य विपन्नोऽस्मि नष्टराज्यमनोरथः ।
प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणः कृतः" ॥ ६५४ ॥
एवं विलपमानं तं परिष्वज्य विभीषणम् ।
सुग्रीवः सत्वसंपन्नो हरिराज्योऽब्रवीदिदम् ॥ ६५५ ॥
"राज्यं प्राप्स्यसि धर्मज्ञ! लङ्कायां नात्र संशयः ।
रावणः सह पुत्रेण स्वकामं नेह लप्स्यते ॥ ६५६ ॥
न रुजा पीडितावेतावुभौ राघवलक्ष्मणौ ।
त्यक्त्वा मोहं वधिष्येते सगणं रावणं रणे" ॥ ६५७ ॥
तमेनं सान्त्वयित्वा तु समाश्वास्य च राक्षसम् ।
सुषेणं श्वशुरं पार्श्वे सुग्रीवस्तमुवाच ह ॥ ६५८ ॥
"सह शूरैर्हरिगणैर्लब्धसंज्ञावरिंदमौ ।
गच्छत्वं भ्रातरौ गृह्य किष्किन्धां रामलक्ष्मणौ ॥ ६५९ ॥
अहं तु रावणं हत्वा सपुत्रं सहबान्धवम् ।
मैथिलीमानयिष्यामि शक्रो नष्टामिव श्रियम्" ॥ ६६० ॥
श्रुत्वैतद्वानरेन्द्रस्य सुषेणो वाक्यमब्रवीत् ।
"दैवासुरं महद्युद्धमनुभूतं सुदारुणम् ॥ ६६१ ॥
तदा स्म दानवा देवाञ्शरसंस्पर्शकोविदाः ।
निजघ्नुः शस्त्रविदुषश्छादयन्तो मुहुर्मुहुः ॥ ६६२ ॥
तानार्तान्नष्टसंज्ञांश्च परासूंश्च बृहस्पतिः ।

त्रिद्याभिर्मन्त्रयुक्ताभिरोषधीभिश्चिकित्सति ॥ ६६३ ॥
तान्यौषधान्यानयितुं क्षीरोदं यान्तु सागरम् ।
जवेन वानराः शीघ्रं संपातिपनसादयः” ॥ ६६४ ॥
एतस्मिन्नन्तरे वायुर्मेघांश्चापि सविद्युतः ।
पर्यस्यन् सागरे तोयं कम्पयन्निव मेदिनीम् ॥ ६६५ ॥
महता पक्षवातेन सर्वद्वीपमहाद्रुमाः ।
निपेतुर्भग्नविटपाः समूला लवणाम्भसि ॥ ६६६ ॥
अभवन् पन्नगास्त्रस्ता भोगिनस्तत्र वासिनः ।
शीघ्रं सर्वाणि यादांसि जग्मुश्च लवणार्णवम् ॥ ६६७ ॥
ततो मुहूर्ताद्गरुडं वैनतेयं महाबलम् ।
वानरा ददृशुः सर्वे ज्वलन्तमिव पावकम् ॥ ६६८ ॥
तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः ।
यैस्तौ सत्पुरुषौ बद्धौ शरभूतैर्महाबलौ ॥ ६६९ ॥
ततः सुपर्णः काकुत्स्थौ दृष्ट्वा प्रत्यभिनन्दितः ।
विममर्श च पाणिभ्यां मुखे चन्द्रसमप्रभे ॥ ६७० ॥
वैनतेयेन संस्पृष्टास्तयोः सरुरुहुर्व्रणाः ।
सुवर्णे च तनू स्निग्धे तयोराशु बभूवतुः ॥ ६७१ ॥
तेजो वीर्यं बलं चौज उत्साहश्च महागुणः ।
प्रदर्शनं च बुद्धिश्च स्मृतिश्च द्विगुणा तयोः ॥ ६७२ ॥
तावुत्थाप्य महावीर्यौ गरुडो वासवोपमौ ।
उभौ तौ सस्वजे हृष्टौ रामश्चैनमुवाच ह ॥ ६७३ ॥
“भवत्प्रसादाद्व्यसनं रावणिप्रभवं महत् ।

आत्रामिह व्यतिक्रान्तौ पूर्ववद्बलिनौ कृतौ ॥ ६७४ ॥
यथा तातं दशरथं यथाजं च पितामहम् ।
तथा भवन्तमासाद्य हृदयं मे प्रसीदति ॥ ६७५ ॥
को भवान् रूपसंपन्नो दिव्यस्रगनुलेपनः ।
वसानो विरजे वस्त्रे दिव्याभरणभूषितः" ॥ ६७६ ॥
तमुवाच महातेजा वैनतेयो महाबलः ।
पतत्रिराजः प्रीतात्मा हर्षपर्याकुलेक्षणः ॥ ६७७ ॥
"अहं सखा ते काकुत्स्थ! प्रियः प्राणो बहिश्चरः ।
गरुत्मानिह संप्राप्तो युवयोः साह्यकारणात् ॥ ६७८ ॥
असुरा वा महावीर्या दानवा वा महाबलाः ।
सुराश्चापि सगन्धर्वाः पुरस्कृत्य शतक्रतुम् ॥ ६७९ ॥
नेमं मोक्षयितुं शक्ताः शरबन्धं सुदारुणम् ।
मायाबलादिन्द्रजिता निर्मितं क्रूरकर्मणा ॥ ६८० ॥
एते नागाः काद्रवेयास्तीक्ष्णदंष्ट्रा विषोल्बणाः ।
रक्षोमायाप्रभावेन शरा भूत्वा त्वदाश्रिताः ॥ ६८१ ॥
इमं श्रुत्वा तु वृत्तान्तं त्वरमाणोऽहमागतः ।
सहसा युवयोः स्नेहात्सखित्वमनुपालयन् ॥ ६८२ ॥
अप्रमादश्च कर्तव्यो युवाभ्यां नित्यमेव हि ।
प्रकृत्या राक्षसाः सर्वे संग्रामे कूटयोधिनः ॥ ६८३ ॥
शूराणां शुद्धभावानां भवतामार्जवं बलम् ।
तन्न विश्वसितव्यं वो राक्षसानां रणाजिरे ॥ ६८४ ॥
सखे राघव! धर्मज्ञ! रिपूणामपि वत्सल! ।

अभ्यनुज्ञातुमिच्छामि गमिष्यामि यथागतम् ॥ ६८५ ॥
बालवृद्धावशेषां तु लङ्कां कृत्वा शरोर्मिभिः ।
रावणं च रिपुं हत्वा सीतां समुपलप्स्यसे ॥ ६८६ ॥
इत्येवमुक्त्वा वचनं सुपर्णः शीघ्रविक्रमः ।
रामं च विरुजं कृत्वा मध्ये तेषां वनौकसाम् ॥ ६८७ ॥
प्रदक्षिणं ततः कृत्वा परिष्वज्य च वीर्यवान् ।
जगामाकाशमाविश्य सुपर्णः पवनो यथा ॥ ६८८ ॥
विरुजौ राघवौ दृष्ट्वा ततो वानरयूथपाः ।
जघ्नुः शङ्खान् संप्रहृष्टाः क्ष्वेलन्त्यपि यथापुरम् ॥ ६८९ ॥
विसृजन्तो महानादांस्त्रासयन्तो निशाचरान् ।
लङ्काद्वाराण्युपाजग्मुर्योद्धुकामाः प्लवङ्गमाः ॥ ६९० ॥

इत्यात्रेयतिरुनारणार्यतनूजश्रीनिवासदासेन संघटिते श्रीमत्संग्रहरामायणे युद्धकाण्डे नागपाशविमोचनभागः संपूर्णः ॥

श्रीरामायणखनितो राघव ! संगृह्य पद्यरत्नानि ।
भक्तिवशात्सङ्घटितां संग्रहमालां समर्पये तुभ्यम् ॥

॥ शुभम् ॥

PRINTED AT SRI RAMA PESS, SHANKARAPURAM, BANGALORE 4.

SRI RAMA PRESS
SHANKARAPURAM,
BANGALORE 4.